सूर्य्योदयं समारभ्य यावत् सूर्य्योदयान्तरम् ॥
तावज्जप्त्वा निरातंकः सर्व्वसिद्धीश्वरो भवेत् ॥

अन्यप्रकार पुरश्चरण प्रणाली कहते हैं यथा—शुक्ल अथवा कृष्णपक्षकी अष्टमीतिथिमें सूर्य्योदयके समयसे आरम्भकर फिर सूर्य्योदय तक जप करै इस प्रकार पुरश्चरण करनेसे एक पुरश्चरण होता है इस पुरश्चरणके बलसे साधक अणिमादि अष्ट सिद्धिका अधीश्वर हो सकता है ॥

अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
शरत्काले चतुर्थ्यादिनवम्यन्तं विशेषतः ।
भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकम् ॥
जपेदेकाकी विजने केवलं तिमिरालये ।
अष्टम्यादि नवम्यन्तमुपवासपरो भवेत् ॥

दूसरे प्रकार पुरश्चरणका क्रम यथा—शरत्कालके समय चतुर्थी तिथिसे नवमी पर्यन्त प्रति दिन रात्रिमें भक्तिपूर्व्वक

देवीकी पूजा कर एक सहस्र जप करै निर्ज्जन अंधेरे घरमें अकेला जप करै अष्टमीसे नवमी पर्यन्त उपवासी होकर जप करना चाहिये।

कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत्।
सहस्रसंख्यजप्येन पुरश्चरणमिष्यते॥

अन्य प्रकार—कृष्णाष्टमीसे आरम्भ करके फिर कृष्णाष्टमी पर्य्यन्त नित्य एक हजार मंत्रका जप करै " इस प्रकार एक मास जप करनेसे पुरश्चरण होता है।

कृष्णां चतुर्द्दशीं प्राप्य नवम्यन्तं महोत्सवे।
अष्टमीनवमीरात्रौ पूजां कुर्य्याद्विशेषतः॥
दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिर्युतम्।
षट्सहस्रं जपेन्नित्यं भक्तिभावपरायणः॥

देवीके पक्षमें पहले कृष्णचतुर्द्दशीसे महानवमी पर्य्यंत प्रति दिन मंत्रजप करै और महाष्टमी तथा महानवमीकी रात्रिमें उपवासी हो भलीभांतिसे देवीकी पूजाकर दशमीके दिनमें मत्स्य मांसादि द्वारा पारण करै इस पुरश्चरणमें प्रतिदिन भक्तिपूर्वक छै हजार जप करना चाहिये।

चतुर्द्दशीं समारभ्य यावदन्या चतुर्द्दशी।
तावज्जप्ते महेशानि पुरश्चरणमिष्यते॥
केवलं जपमात्रेण मन्त्रसिद्धिर्भवेत्तु हि॥

चौदशसे पुनर्वार चौदशतक प्रति दिन एक हजार जप करनेसे पुरश्चरण होताहै है इस प्रकार जप करनेसे मंत्रसिद्धि होती है ।

सूर्य्योदयं समारभ्य यावत्सूर्य्योऽस्तगो भवेत् ।
तावज्जप्त्वा महेशानि पुरश्चरणमिष्यते ॥

हे महेश्वरि ! सूर्य्योदयसे सूर्यास्त पर्य्यन्त बराबर जप करनेसेभी पुरश्चरण होता है ।

वीरसाधन ।

अष्टम्याञ्च चतुर्द्दश्यां पक्षयोरुभयोरपि ।
कृष्णपक्षे विशेषेण साधयेद्वीरसाधनम् ॥

कृष्ण किम्वा शुक्लपक्षकी अष्टमी अथवा चतुर्द्दशी तिथिमें वीरसाधन करै वीरसाधन कृष्णपक्षमें श्रेष्ठ है ।

तत्सार्द्धप्रहरे यामे गते च सुरसुन्दरि ।
शवं वापि चितां वापि नीत्वा गत्वा यथासुखम् ॥
साधयेत्स्वहितं मंत्री मंत्रध्यानपरायणः ।
भयं नैव तु कर्त्तव्यं हास्यं तत्र विसर्ज्जयेत् ॥
चतुर्द्दिशं न वीक्षेत मंत्रमेव समभ्यसेत् ॥

साधक डेढप्रहर रात्रि व्यतीत होनेपर चितास्थानसे एक शव लाय मंत्र ध्यान परायण हो अपने हित साधनके निमित्त कार्य्य करै इस साधनके समय साधक किसी प्रकार न डरे हास्य परिहास्य त्याग करै और किसी ओर न देखकर एकाग्र चित्तसे केवल मंत्रका जप करता रहे ।

पूजाद्रव्यादि ।

सामिषान्नं गुड़ं छागं सुरा पायसमिष्टकम् ।
नानाफलञ्च नैवेद्यं स्वस्वकल्पोक्तसाधितम् ॥

वीरसाधन कार्य्यमें जिन सम्पूर्ण द्रव्योंकी आवश्यकता है वही कहे जाते हैं सामिषान्न गुड़ छाग सुरा पायस (खीर) अनेक प्रकारके फल नैवेद्य और स्वस्वदेवताके पूजा विहित-द्रव्य ।

चितास्थानं समानीय सुहृद्भिः शस्त्रपाणिभिः ।
समानगुणसम्पन्नैः साधयेद्वीतभीः स्वयम् ॥

साधक इन सम्पूर्ण द्रव्योंको श्मशान स्थानमें लायकर निर्भयचित्तसे समान गुणशाली अस्त्र धारी बन्धुवर्गोंके सहित वीर साधन करै ।

अपिच ।

बल्यर्थं सामिषान्नञ्च गुड़ं छागं तथा मधु ।
पिष्टकं परमान्नञ्च पयो मूलं फलं तथा ॥
सप्तपात्रं बलिं कृत्वा चतुः पात्रं चतुर्दिशि ।
पात्रत्रयं सदा मध्ये स्थापयेन्मनुनामुना ॥
गुरुं वा भ्रातरं वापि ब्राह्मणान्वापि सुव्रतान् ।
अन्यानपि च रक्षार्थं किंचिद्दूरे निवेशयेत् ॥

मतान्तरमें लिखाहै कि बलिके लिये आमिष अन्न गुड छाग मधु पिट्ठी परमान्न दुग्ध फल और मूल यह सम्पूर्ण द्रव्य

संग्रहकरके वीरसाधन करै बलिद्रव्य सातपात्रोंमें रखकर उस के चारपात्र चारोंओर और बीचमें तीनपात्र स्थापन कर मंत्र पाठपूर्व्वक निवेदन करै गुरु भ्राता तथा सुव्रत ब्राह्मणको आत्मरक्षाके लिये थोडी दूरपर नियुक्त करै ।

चितालक्षण ।

असंस्कृता चिता ग्राह्या न तु संस्कारसंस्कृता ।
चाण्डालादिषु संप्राप्ता केवलं शीघ्रसिद्धिदा ॥

अनन्तर चितालक्षण कहते हैं । वीरसाधन कार्य्यमें असंस्कृत चिता ही ग्रहण करने योग्य होतीहै संस्कृत अर्थात् जल सेकादि द्वारा परिष्कृतचितामें वीरसाधन न करे चाण्डालादिके श्मशानमें वीरसाधन करनेसे शीघ्रही फलप्राप्त होताहै ।

अधिकारी निरूपण ।

महाबलो महाबुद्धिर्म्महासाहासिकः शुचिः ।
महास्वच्छो दयावांश्च सर्व्वभूतहिते रतः ॥

वीरसाधनका अधिकारी निरूपण कहतेहैं। जो महाबलशाली महाबुद्धि महासाहसयुक्त सरलचित्त दयाशील सर्व्वप्राणियोंके हित साधनमें अनुरक्त है वही इसकार्यका उपयुक्त पात्रहै ।

ततः सामान्यार्घ्यं विधाय स्वस्तिवाचनपूर्व्वकं संकल्पं कुर्य्यात् ॥ यथा—ॐ अद्येत्यादि अमुकगोत्रःश्रीअमुकदेवशर्मा अमुकमंत्रसिद्धिकामः श्मशानसाधनमहं करिष्ये ।इति संकल्प्य ।

वस्त्रालंकारभूषणाद्यैर्भूषितः पूर्वदिङ्मुखः
अस्त्रान्तमूलमंत्रेण प्रोक्षणं यागभूमिषु ।
मूलमंत्रेण फट्कारान्तेनेत्यर्थः ॥
गुरुपादाम्बुजन्ध्यात्वा गणेशं बटुकं तथा ।
योगिनीं मातृकाञ्चैव वामपादपुरःसरम् ॥

तथा च–गणेशादिकं संपूज्य अस्त्रमंत्रेणात्मानं संरक्ष्य

अस्त्रमंत्रेण मंत्रज्ञो रक्षामात्मनि कारयेत् ।

ततः–ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः॥
पिशाचाःसिद्धयो यक्षा गन्धर्वाप्सरसां गणाः।
योगिन्यो मातरो भूताःसर्वाश्च खेचराःस्त्रियः॥
सिद्धिदास्ता भवन्त्वत्र तथा च मम रक्षिकाः।
प्रणम्य मनुनानेन पुष्पाञ्जलित्रयं क्षिपेत् ॥

इसप्रकार अधिकारी व्यक्ति सामान्य अर्घ्य स्थापन कर स्वशाखोक्त स्वस्तिवाचन पूर्वक संकल्प करे संकल्पवाक्य मूलमें लिखे गये हैं संकल्पके उपरान्त साधक वस्त्रालंकारादि अनेक भूषणोंसे विभूषित हो पूर्वाभिमुख बैठकर फट्कारान्त मूल मंत्रसे यागस्थान प्रोक्षण करै फिर गुरुके वाम पादकी रजका ध्यानकर गणेश वटुक योगिनी और मातृकागणोंकी पूजा करै अनन्तर साधक "फट्" इस मंत्रसे आत्मरक्षा करै "ये चात्र संस्थिता देवा" जो यहां देवता भयानक राक्षस पिशाच सिद्ध यक्ष गन्धर्व अप्सराओंके गण योगिनीमाता और सब खेचरोंकी स्त्रियें स्थित हैं वह सब सिद्धि देनेवाली होकर

मेरी रक्षा करैं इत्यादि मूलके लिखित मंत्रोंसे प्रणामपूर्वक तीन अञ्जलि पुष्प प्रदानकरै ।

श्मशानाधिपतिं पश्चाद्भैरवं कालभैरवम् ।
महाकालं जपेत् पश्चात् पूर्व्वादिदिक्चतुष्टये ॥
शब्दबीजं ततः पश्चात् श्मशानाधिपतत्परम् ।
इममन्ते सामिषान्नं बलिं गृह्ण ततः परम् ॥
गृह्णगृह्णापयद्वन्द्वं विघ्ननिवारणं ततः ।
कुरु सिद्धिं ममान्तञ्च प्रयच्छ स्वाहयान्वितम् ॥
प्रणवाद्येन मनुना प्रथमो बलिरीरितः ।
मायान्ते भैरवात् पश्चाद्भयानकस्ततः परम् ॥
पूर्व्ववद्बलिमुद्धृत्य दक्षिणे बलिमाहरेत् ।
पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत् ॥
शब्दान्ते कालशब्दान्ते भैरवेति ततः परम् ।
श्मशानाधिप इत्येवं पूर्व्ववच्चोत्तरे हरेत् ॥
हुमन्ते च महाकालात् पश्चात् पूर्व्ववदुच्चरेत् ।
पाद्यादिभिश्च मंत्रज्ञो बलिं पश्चान्निवेदयेत् ॥

तद्यथा–श्मशानाधिपतिं पञ्चोपचारैः सम्पूज्यानेन मंत्रेण बलिं दद्यात् ॥

तद्यथा–ओं हूँ श्मशानाधिप इमं सामिषान्नबलिं गृह्ण गृह्ण गृह्णापय विघ्ननिवारणं कुरु सिद्धिं मम प्रयच्छ स्वाहा ॥

ततो भैरवं पूर्व्ववत्संपूज्य दक्षिणस्यां ह्रीं भैरवभयानक इमं सामिषान्नबलिमित्यादि ।
ततः पश्चिमे कालभैरवं संपूज्य हूँ महाकाल श्मशानाधिप इमं सामिषान्नबलिमित्यादि ॥
चितामध्ये ततो दद्याद्बलित्रयमनुत्तमम् ।
कालरात्रि महाकालि कालिके घोरनिस्वने ॥
कालिकायै बलिं दत्वा भूतनाथाय दापयेत् ।
शब्दान्ते भूतनाथान्ते श्मशानाधिप इत्यपि ॥
प्रणवाद्येन मनुना दापयेद्बलिमुत्तमम् ।
शब्दान्ते तु सर्व्वगणनाथान्ते चाधिपाय च ॥
श्मशानमस्तके दत्वा पञ्चगव्येन सुन्दरि ।
अद्भिश्च प्रोक्षणं कृत्वा पीतवस्त्रं न्यसेत्ततः ॥
भूर्ज्जं वा वटपत्रे वा तत्र पीठमनुं न्यसेत् ।
पीठमस्तीर्य्यं तस्मिन् वै बद्धवीरासनस्ततः ॥
वीरार्द्दनेन मनुना रक्षां दिक्षु प्रकल्पयेत् ॥

अस्यार्थः—श्मशानास्थ्यादिकं पञ्चगव्येन संप्रोक्ष्य भूर्ज्जपत्रादौ तत्र व्याघ्रचर्म्मादि पीठमास्तीर्य्य तत्र वीरासनक्रमेणोपविश्य वीरार्द्दनेन मंत्रेण चतुर्द्दिक्षु रक्षां कुर्य्यात् ॥

वीरार्द्दनमंत्रस्तु—हूँ हूँ ह्रीं ह्रीं कालिके घोरदंष्ट्रे प्रचण्डे चण्डनायिके दानवान् दारय हन् हन्

शवशरीरे महाविघ्नं छेदय छेदय स्वाहा हूँ फाड़िति ॥

अनेन मंत्रितं लोष्टं दशदिक्षु विनिक्षिपेत् ।
तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते ॥

नीलतंत्रे—कूर्च्चद्वयं ततो देवि मायायुग्मं ततः परम् ।
कालिके घोरदंष्ट्रे च प्रचण्डे चण्डनायिके ॥
दानवान् दारयेत्युक्त्वा हनेति द्वितयं पुनः ।
शवशरीरे महाविघ्नं छेदयाद्वितयं पुनः ॥
द्विठान्तो वर्म्मचास्त्रान्तो वीरार्हनमनुर्म्मतः ॥

इस विषयका वीरतंत्रमें जो प्रमाण लिखा है वह सब वचन इस स्थलके मूलमें दिखाई देंगे, पूर्व्वकी ओर श्मशानाधिपति दक्षिणकी ओर भैरव पश्चिमकी ओर कालभैरव और उत्तरकी ओर महाकालभैरवकी पूजा करके बलिप्रदान करै, बलिका मंत्र और मंत्रोद्धारका प्रमाण मूलमें स्पष्टरूपसे लिखा है। मूलके लिखित मंत्रसे पूर्व्वादिक्रमानुसार श्मशानाधिपति इत्यादि भैरवगणोंकी पूजा और बलिप्रदान करै यह आमिष सहित बलि ग्रहण करो विघ्ननिवारण करो और मुझे सिद्धि दो पहला बलि ओंकारयुक्त मंत्रसे दे फिर भैरवभयानक मंत्रलिखित नामोंको उच्चारण पूर्व्वक पूर्व्ववत बलिका उद्धारकर दक्षिणमें दे, पश्चिममें कालदेवको ओंकार पूर्व्वक बलि दे शब्दकालादि शब्द लगाकर नीचे लिखा मंत्र पढे चितामें शेष तीनों बलिप्रदान करै यथा—"ओं कालरात्रि

महाकालि" इत्यादि मंत्रसे कालिका देवीको अवशिष्ट तीनों बलिका एक बलिद्रव्य प्रदान करके "ओं हूँ भूतनाथ श्मशानाधिप इमं सामिषान्नबलिं" इत्यादि मंत्रसे अपर बलि निवेदन करै फिर 'ओं हूँ सर्व्वगणनाथ श्मशानाधिप इमं सामिषान्नबलिं' इत्यादि मंत्रसे तीसरी बलि निवेदन करनी चाहिये। इस प्रकार बलिप्रदान कर पञ्चगव्य और जलद्वारा श्मशानस्थ अस्थ्यादि प्रोक्षण कर उसके ऊपर पीतवस्त्रड़ाल वटपत्र अथवा भूर्ज्जपत्रमें पीठमंत्र लिख पीतवस्त्रके ऊपर स्थापन करै उसके ऊपर व्याघ्र चर्म्मादि आसन पिछाकर वीरासनमें बैठे वीरार्द्दन मंत्रसे चारों ओर रक्षा करै "हूँ हूँ ह्रीं ह्रीं कालिके" इत्यादि मूलके लिखितवीरार्द्दन मंत्रसे पूर्व्वादि दशों ओर लोहा निक्षेप करै इसप्रकार दशों ओर रक्षाकरके उनमें बैठकर साधन करनेसें कोई विघ्न नहीं होसकता वीरार्द्दन मन्त्रोद्धारका जो सम्पूर्ण प्रमाण नीलतंत्रमें लिखा है वह समस्त वचनस्थलके मूलमें उद्धृत हुएहैं।

यदि प्रमादाद्देवेशि साधको भयविह्वलः।
ततस्तैस्तैः सुहृद्वर्गै रक्षितो नाभिभूयते॥

साधनकालके समय यदि साधक किसीप्रकार विह्वल भयसे हो तो तत्काल प्रथम कहे हुए सुहृद्वर्ग तत्काल उसका भय निवारण करैं सुहृद्गण सर्व्वदा इस प्रकार सतर्क रहैं कि जिसमें किसी प्रकार साधक भयसे विह्वल न हो।

सितार्ककर्पूरसितवाट्यालकतूलैर्व्वर्त्तिकां नि-
र्म्माय तत्र प्रदीपं संस्थाप्य देव्यस्त्रेभ्यो नमःइत्य-
स्त्रं संपूज्य अधस्तात् ज्वलत्प्रदीपं निखनेत् ॥
हते तस्मिन्महादीपे विघ्नैश्च परिभूयते
तदधश्चास्त्रमंत्रेण निखनेत्कुलदीपकम् ॥

फिर कर्पूर मिश्रित सफेद आँक और सफेद वाट्यालकी रुई द्वारा बत्ती बनाय दीपक जलाय उसस्थानमें रखदे "ओं देव्यस्त्रेभ्यो नमः" इस मंत्रसे अस्त्र पूजा कर साधक इस प्रज्वलि । दीपकको नीचे रक्खे इस विषयका प्रमाण जो सम्पूर्ण तंत्रोंमें लिखाहै वह समस्त वचन मूलमें उद्धृत हुएहैं इस दीपकके बुझजानेपर साधकको महा भय विघ्न होताहै ।

ततस्तत्कल्पोक्तभूतशुद्ध्यादि न्यासजालं विधाय
इष्टदेवतां संपूज्य संकल्पमंत्रं जपेत् ॥
संकल्पस्तु—अद्येत्यादि अमुकगोत्रःश्रीअमुकदेवशर्म्मा
अमुकमन्त्रस्यामुकसंख्यजपमहं करिष्ये॥
इति संकल्प्य—देवताध्यानपुरःसरं मंत्रं जपेत् ।
तथा च—तत्तत्कल्पविधानेन भूतशुद्ध्यादिकं चरेत् ।
षोढ़ां वा तारकं वापि विन्यस्य पूजयेत्ततः ॥
मंत्रध्यानपरो भूत्वा जपेन्मंत्रमनन्यधीः ॥

इसके उपरान्त स्वीय कल्पोक्त विधानसे भूतशुद्ध्यादि और न्यास समूह करके इष्टदेवताकी पूजा समापन करता हुआ

संकल्प पूर्व्वक जप आरम्भ करै संकल्प वाक्य मूलमें लिखे गये हैं देखनेसे समझमें आजायँगे संकल्पके अनन्तर अपने हृदयमें देवताका ध्यान कर मंत्र जप करै इसका प्रमाण अन्यान्य तंत्रोंमेंभी लिखाहै ।

जपनियमस्तु–एकाक्षरी यदि भवेद्दिक्सहस्रंततोजपेत् ।
द्व्यक्षरेऽष्टसहस्रं स्यात्त्र्यक्षरे चायुतार्द्धकम् ॥
अतः परन्तु मंत्रज्ञो गजान्तकसहस्रकम् ।
निशायां वा समारभ्य ह्युदयान्तं समाचरेत् ॥
गजान्तकमित्यष्टोत्तरसहस्रमित्यर्थः ।

जपका नियम यथा–एकाक्षर मंत्र दशहजार जपे द्व्यक्षर मंत्रस्थलमें आठहजार त्र्यक्षरमंत्रसे पांचहजारवार जपकरै चतुरक्षरादिमंत्रस्थलमें अष्टोत्तरसहस्र मंत्र जप करना चाहिये ।

यद्यसह्यभयं कर्णे नेत्रे वस्त्रेण बन्धयेत् ।
ततोऽर्द्धरात्रपर्य्यन्तं यदि किञ्चिन्न लक्ष्यते ॥
जयादुर्गाख्यमनुना तेनैव सर्षपान् क्षिपेत् ।
जयदुर्गामन्त्रस्तु–ओं दुर्गे दुर्गे रक्षिणि स्वाहा ॥
ओं तिलोऽसि सोमदैवत्यो गोसवस्तृप्तिकारकः ।
पितॄणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः ॥
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः ।
इति पठित्वा ईशानादि चतुर्द्दिक्षु तिलांश्च निक्षिपेत् । ततः सप्तपदं गत्वा तत्रैव संविशेत्पुनर्देवतां संपूज्य जपेत् ॥

रात्रिके समयसे आरम्भकर सूर्य्योदय पर्य्यन्त जप करना चाहिये यदि साधक असह्य भयसे अत्यन्त विह्वलहो तो वस्त्र से साधकके कर्ण और नेत्र बांधदे जिससे वह कुछ देख सुन-नसके यदि आधीरात बीतने पर भी कुछ न दीखे तो "ओं दुर्गे रक्षिणिस्वाहा" इस जय दुर्गा मंत्रसे ईशानादि चारों कोणमें सरसों और"तिलोऽसि" इत्यादि मंत्रसे तिल निक्षेप करने चाहियें इसके उपरांत पहले बैठनेके स्थानसे सात पग चल उस स्थानमें बैठ पुनर्वार देवताकी पूजा करके जप करना चाहिये ।

ततो यदि वरं वरयेति वदेत्तदा सत्यं कारयेत् ॥
तथा च—वरं वरयचेत्युक्ते साधकः स्थिरमानसः ।
सत्यन्तु कारयित्वा च वरयेद्वरमुत्तमम् ॥

यदि जप करते करते कोई आनकर "वर ग्रहणकर" यह बात कहे तब देवता को प्रतिज्ञा बद्धकर अपना अभि-लषित वर ग्रहण करै ।

जपादौ तु बलिं दत्वा पश्चादपि बलिं हरेत् ।
जपान्ते जपमध्ये वा देहि देहीति भाषिते ॥
तदापि च बलिं दद्यान्महिषं वापि छागलम् ॥
बलिञ्च यवपिष्टमयेन दद्यात् ॥

जपके आदिमें जपके मध्यमें और जपके अंतमें बलि प्रदान करना चाहिये जपके आदि मध्य अथवा अंत समय

में देवी जब बलिकी प्रार्थना करैं तबही महिष अथवा छाग बलि प्रदान करे यवकी पिट्ठी द्वारा महिष अथवा छाग बना कर बलि देवे ।

यदा बलिं प्रार्थयते नरकुञ्जरमेव वा ।
दिनान्तरेऽपि दास्यामि स्वीकृत्य स्वगृहं व्रजेत् ॥

जब देवी नर अथवा हस्तीके बलिकी प्रार्थना करै तब (दिनान्तरमें बलि प्रदान करूंगा) इसप्रकार प्रतिज्ञा कर अपने गृहको गमनकरै ।

अपरेह्नि ततो दद्यात्पिष्टेन नरकुञ्जरान्।
पिष्टेनेति यवधान्योद्भवेनेत्यर्थः ॥

दूसरे दिन जौकी पिट्ठी अथवा धान्यकी पिट्ठीसे नर और हस्ती बनाकर खड्गद्वारा पूर्वोक्त मंत्रसे छेदन करै ।

तथा च—यवक्षोदमयं वापि शालिक्षोदमयन्तथा ।
चन्द्रहासेन विधिवत्तत्तन्मंत्रेण घातयेत् ॥
जपान्ते तु बलिं दद्याद्देवतायै यथाविधि ।
महिषं छागलं वापि गृहीत्वा वरमेव च ॥
गृहं गच्छेत्स्वसुहृदा सार्द्धं संहृष्टमानसः ।
ततो दक्षिणां दद्यात् ॥
समाप्य साधनं देवि दक्षिणां विभवावधि ।
गुरवे गुरुपुत्राय तत्पत्न्यै वा निवेदयेत् ॥

तत्रान्तरमें जो सम्पूर्ण प्रमाण लिखाहै वह समस्त प्रमाण इस स्थलमें उद्धृत है योगिनी हृदयमें लिखा है कि जपके

अन्तमें उक्त रूपसे महिष अथवा छागका बलि प्रदान कर वर ग्रहण पूर्व्वक सुहृद वर्गोंके सहित प्रसन्न चित्तसे घर जाय और अपनी शक्तिके अनुसार गुरु, गुरुपुत्र अथवा गुरुपत्नी को दक्षिणा देवे ।

शवसाधन ।

स्थाननियम ।

शून्यागारे नदीतीरे पर्व्वते निर्ज्जनेऽपि वा ।
बिल्वमूले श्मशाने वा तत्समीपे वनस्थले ॥

इसके उपरान्त शवसाधन प्रक्रिया कही जाती है शवसाधन के स्थान सम्बन्धमें तंत्रमें लिखा है कि शून्य गृह नदीका तट पर्व्वत निर्ज्जन प्रदेश बिल्वमूल श्मशान अथवा श्मशान समीपस्थ वनप्रदेशमें शवसाधन कार्य्य करै ।

अष्टम्याञ्च चतुर्द्दश्यां पक्षयोरुभयोरपि ।
भौमवारे तमिस्रायां साधयेत्सिद्धिमुत्तमाम् ॥

कृष्ण अथवा शुक्लपक्षकी अष्टमी और चतुर्द्दशी तिथिमें मंगलवारको रात्रिके समय उक्त साधन करनेसे साधक उत्तमा सिद्धि प्राप्त कर सकता है ।

माषभक्तञ्च बल्यर्थं धूपदीपादिकन्तथा ।
तिलाः कुशाः सर्षपाश्च स्थापनीयाः प्रयत्नतः ॥

साधक माषभक्त(उर्दभोजन) बलिके निमित्त तिल कुश सरसों और धूप दीपादि पूजा की उपकरण समाग्री संग्रह कर स्थापन करै ।

ततः पूर्व्वोक्तान्यतमस्थानं गत्वा सामान्यार्घ्यं विधाय पूर्व्वमुखो मूलान्ते फट्कारं दत्त्वा यागभूमिं संप्रोक्ष्य, गुरुं गणेशं बटुकं योगिनीञ्च चतुर्दिक्षु पूर्व्वादितः संपूज्य पूर्व्वोक्तवीरार्द्दनमंत्रं भूमौ विलिख्य ये चात्रेत्यादि पूर्व्वोक्तक्रमेण पुष्पाञ्जलित्रयं दत्त्वा अघोरमंत्रेण शिखाबन्धनं विधाय, सुदर्शनमंत्रान्ते आत्मानं रक्ष रक्षेति हृदि हस्तं दत्त्वा आत्मरक्षां कुर्य्यात् ॥

अघोरसुदर्शनमंत्रौ तु—ओं ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोरा घोरतरतनुरूप चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातय हुँफट् सहस्रारे हुँफट् ॥

फिर पूर्व्वोक्त कोई स्थान मनोनीत कर उस स्थानमें जाय सामान्य अर्घ्य स्थापनके अनन्तर साधक पूर्व्वाभिमुख हो मूल मंत्रके पश्चात् "फट्" इस मंत्रसे याग स्थान प्रोक्षण करै। अनन्तर पूर्व्वकी ओर गुरु दक्षिणमें गणेश पश्चिममें वटुक और उत्तरमें योगिनीकी पूजाकर भूमिमें पूर्व्वोक्त वीरार्दन मंत्र लिख पूर्व्वकथित "ये चात्र" इत्यादि मंत्रसे पहलेकी समान पुष्पांजलि प्रदान पूर्व्वक प्रणाम कर पूर्व्व कथित नियमसे श्मशानाधिपति देवताओंको बलि प्रदान करै और अघोर मंत्रसे शिखा बन्धन कर अपने हृदयमें हस्त स्थापन पूर्व्वक

सुदर्शन मंत्रके अनन्तर "आत्मानं रक्ष रक्ष" यह मंत्र पाठकर आत्म रक्षा करै घोर सुदर्शन मंत्र मूलमें लिखे हैं।

ततः पूर्व्वोक्तक्रमेण भूतशुद्धिं न्यासजालञ्च विधाय जयदुर्गामन्त्रेण दिक्षु सर्षपान् विकीर्य्य तिलोऽसीति मन्त्रेण तिलांश्च विकीर्य्य विहितशवसमीपं गच्छेत् ॥

अनन्तर पूर्व्वोक्त प्रकारसे भूत शुद्धि और विविध न्यास करके जय दुर्गा मंत्रसे चारों ओर सरसों डाल "तिलोसि" इत्यादि मंत्रसे तिल बखेर कर विहित शवके निकट उपस्थित हों।

विहितशव।

यष्टिविद्धं शूलविद्धं खड्गविद्धं जले मृतम्।
वज्रविद्धं सर्पदष्टं चाण्डालञ्चाभिभूतकम् ॥
तरुणं सुन्दरं शूरः रणे नष्टं समुज्ज्वलम्।
पलायनविशून्यन्तु सम्मुखे रणवर्त्तिनाम् ॥

इस समय शव साधन कार्य्यमें कौन जातीय और किस प्रकारका शव श्रेष्ठ है वही कहते हैं। तन्त्रान्तरमें लिखा है कि जिस पुरुषने लाठी शूल अथवा खड्गाघातसे प्राण त्याग किया हो जलमें गिरकर मरगया है वज्रपात अथवा सर्पके काटनेसे जिसकी मृत्यु हुईहो इस प्रकार चाण्डाल जातीय पुरुषके मृतक देहको इस कार्य्यमें शवकर इस शवकी तरुण

अवस्था और सुन्दर अंग होना आवश्यक है और जिस व्यक्तिने सम्मुख युद्धमें न भागकर प्राण त्याग किया हो, उसका देह भी शवसाधन कार्य्यमें श्रेष्ठ है।

तथा—यष्टिप्रभृतिविद्धं वा चाभिभूतं जले मृतम्।
शवमानीय कर्त्तव्यं नाहरेत्स्वेच्छया मृतम्॥
स्त्रीवश्यं पतितास्पृश्यं नयवर्ज्जं हि तूवरम्।
अव्यक्तलिंगं कुष्ठं वा वृद्धभिन्नं शवं हरेत्॥
न दुर्भिक्षमृतञ्चापि न पर्य्युषितमेव वा।
स्त्रीजनञ्चेदृशं रूपं सर्व्वथा परिवर्जयेत्॥

औरभी लिखा है कि लाठी इत्यादिके आघातसे जिसकी मृत्यु हुई हो, अथवा जलमें गिरकर जो व्यक्ति मरगया है उसका देह ग्रहण करै स्वेच्छामृत व्यक्तिका देह शव साधनमें स्वीकार नकरै जो व्यक्ति स्त्रीके वशीभूत पतित छूनेके अयोग्य दुर्नीति युक्त डाढी हीन क्लीव कुष्ठरोगी अथवा वृद्धहो उन सम्पूर्ण शवोंको त्याग करै दुर्भिक्षमें मरे हुए मनुष्यका देह शवद्वारा साधन करने पर उससे कार्य्यमें ग्रहण करने योग्य नहीं है तत्काल मृत शव विहित है पर्युषित (बासी) शव द्वारा साधन करने पर उससे कार्य्य सिद्धि नहीं होती अत एव उक्त प्रकार शव और स्त्रीका मृतक देह इस कार्य्यमें ग्रहण न करै।

तथा–ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् । महा
(सद्य) शवाः प्रशस्ताःस्युः प्रधाने वीरसाधने ॥
क्षुद्रप्रयोगकर्त्तॄणां प्रशस्ताः सर्व्वसिद्धये ॥

तंत्रान्तरमें लिखाहै कि ब्राह्मण और गोमय (गोबर) त्यागकर शवसाधन कार्य करै इस शव साधन कार्य्यमें सद्यो मृत पुरुषका देह श्रेष्ठ है जो ऐहिक कार्य्यके उद्देश्यसे यह साधन करै उसको सर्व्वकार्य्य साधनार्थ शवासन श्रेष्ठहै।

एवमुक्तं शवं गृहीत्वा मूलमंत्रेण पूजास्थानमानयेत् ।
तत्समीपं गत्वा ओंफट् इति शवमभ्युक्ष्य ओं हूँ मृतकाय नमः फडिति पुष्पाञ्जलित्रयं दत्वा स्पृष्ट्वा प्रणमेत् ॥
तथा–प्रणवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणञ्चरेत् ।
प्रणवं कुर्च्चबीजञ्च मृतकाय नमश्च फट् ॥
पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत्स्पर्शपूर्व्वकम् ।

इसप्रकार सुलक्षण सम्पन्न शव ले मूलमंत्रसे पूजास्थानमें गमन करै फिर शवके समीपमें बैठकर "ओं फट्" इस मंत्रसे शवके ऊपर प्रोक्षण करै अनन्तर "ओं हूँ मृतकाय नमः फट्" इस मंत्रसे तीन पुष्पांजलि प्रदान पूर्व्वक शव स्पर्शकर प्रणाम करै इस विषयके ग्रन्थान्तरमें जो समस्त वचन लिखे हैं वह सम्पूर्ण प्रमाण इस स्थलमें ग्रन्थकारने उद्धृत किये हैं ।

प्रणाममंत्र ।

वीरेश परमानन्द शिवानन्द कुलेश्वर ।
आनन्दभैरवाकारदेवीपर्य्यंक शंकर ॥

वीरो (शिवो)ऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने ।
अनेन शवमंत्रेण प्रणम्य क्षालयेत् शवम् ॥

ॐ हूं मृतकाय नमः अनेन क्षालयित्वा सुगन्धिजलेन स्नापयित्वा वाससा जलमुत्तोल्य, धूपैर्धूपयित्वा चन्दनादिना शवं प्रलिप्य शवस्य कटिदेशं धृत्वा पूजास्थानं समानयेत् ॥

तथा-तारशब्दं मृतकाय नमोऽन्तं मंत्रमुच्चरेत् ।
शवस्य स्नानमंत्रोऽयमित्यादि ॥

अपिच-धूपेन धूपितं कृत्वा गन्धादिना विलिप्य च ।
रक्ताङ्गो (मुक्तो) यदि देवेशि भक्षयेत्कुलसाधकम् ॥

हे वीरेश, हे परमानन्द, हे शिवानन्द, हे कुलेश्वर तुम आनन्दभैरव स्वरूप और देवीके पर्य्यंङ्क शंकररूपसे विद्यमानहो मैं वीरभावसे देवीकी अर्चनामें तुमको नमस्कार करता हूं तुम उठो इस शव प्रणाममंत्रसे प्रणाम करके शवको प्रोक्षण करै "ॐ हूं मृतकाय नमः" इस मंत्रसे प्रक्षालन और सुगन्धित जलद्वारा शवको स्नान कराय वस्त्रसे शवशरीर मार्ज्जन धूपद्वारा पोषण और शवका शरीर चन्दनादिद्वारा अनुलिप्त करै और शवकी कमर पकडकर पूजास्थानमें लाना चाहिये इस विषयके प्रमाण स्वरूप कालीतंत्रके लिखित वचन मूलमें उद्धृत हुए हैं तंत्रान्तरमें लिखा है कि शवको धूपद्वारा धूपितकर गन्धादिसे

अनुलेपन पूर्व्वक शवसाधन कार्य्य आरम्भ करै यदि शव रक्त वर्ण हो तो साधकको भक्षण करता है ।

ततःकुशशय्यां कृत्वा पूर्व्वशिरसं कृत्वा शवं स्थापयेत्।

तथा–कुशशय्यां परिष्कृत्य तत्र संस्थापयेच्छवम् ॥

तत एलालवंगकर्पूरखदिराद्यार्द्रकं ताम्बूलं तन्मुखे दत्त्वा शवं अधोमुखं कुर्य्यात् ॥

तथा च–एलालवंगकर्पूरजातीखादिरमार्द्रकम् ।
ताम्बूलं तन्मुखे दत्वा शवं कुर्य्यादधोमुखम् ॥
तत्पृष्ठं चन्दनेनापि विलिप्य प्रयतः सुधीः ।
बाहुमूलादिकट्यन्तं चतुरस्रं विधाय च ॥
मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम् ।
पीठमंत्रं लिखेन्मध्ये तत्तत्कल्पविधानतः ॥

ॐ ह्रीं फडितिमंत्रेण तत्कल्पोक्तपीठमंत्रं लिखेत्। तदुपरि कम्बलाद्यासनं न्यसेत् ॥

गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः ।
यद्युपद्रावयेत्तस्य दद्यान्निष्ठीवनं शवे ॥
पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत् ॥

ततो द्वादशांगुलयज्ञकाष्ठानि दशदिक्षु पूर्व्ववत् संस्थाप्य इन्द्रादिदश देवताः संपूज्य पूसामिषान्नेन बलिं दद्यात् ॥

तथा–द्वादशांगुलमानानि यज्ञकाष्ठानि दिक्षु च ।
संस्थाप्य पूजयेत्तत्र क्रमादिन्द्रादिदेवताः ॥

फिर कुशद्वारा शय्या बनाय उसके ऊपर पूर्व्वको शिर करके शव स्थापन करना चाहिये अनन्तर शवके मुखमें इलायची, लौंग, कपूर, खैर, अदरक, ताम्बूल और जायफल, प्रदानकर शवको अधोमुख रक्खे शवकी पीठ चन्दनादिसे अनुलेपनकर बाहुमूलसे कटि पर्य्यन्त चारों ओर मंडल लिखे चारों ओरमें अष्टदल पद्म और चतुर्द्वार अंकितकर पद्ममें "ओं ह्रीं फट्" इस मंत्रके सहित पूर्वोक्त पीठमंत्र लिखना चाहिये इसके ऊपर कम्बलादि आसन बिछावे फिर शवके समीपमें जायकर शवकी कमर पकडे इससे शव यदि किसी प्रकार उपद्रव करै तो शवके शरीरमें निष्ठीवन (थूथू) निक्षेपकर फिर प्रक्षालन पूर्व्वक जप स्थानमें लाना चाहिये फिर जपस्थानके दशों ओर द्वादशांगुलि परिमित अश्वत्थादि यज्ञीयकाष्ठ गाढकर पूर्व्वादि क्रमसे इन सम्पूर्ण काष्ठोंमें इन्द्रादि दशदिक्पालोंकी पूजा करै।

तत्रायं क्रमः—ॐ लां इन्द्राय सुराधिपतये ऐरावत
वाहनाय वज्रहस्ताय सशक्तिपारिष-
दाय सपरिवाराय नमः। इति पाद्या-
दिभिः संपूज्य बलिं दद्यात्॥

बीजमिन्द्राय संलिख्य सुराधिपतये ततः।
इमं बलिं गृह्णयुग्मं गृह्णापय युगं ततः॥
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयम्।

अनेन मनुना पूर्व्वं बलिं दद्याच्च सामिषम् ॥
स्वस्वनामादिकं कृत्वा पूर्व्ववद्बलिमाहरेत् ।
सर्व्वेषां लोकपालानां ततः साधकसत्तमः ॥

ओं लां इन्द्राय सुराधिपतये इमं बलिं गृह्णगह्ण-गृह्णापय गृह्णापय विघ्ननिवारणं कृत्वा मम सिद्धिं प्रयच्छ स्वाहा ।

एषमाषभक्तबलिः ओं लां इन्द्राय स्वाहा ।
ओं वां अग्नये तेजोऽधिपतये मेषवाहनाय
सपरिवाराय शक्तिहस्ताय सायुधाय नमः ॥

इति संपूज्य ओं वां अग्नये तेजोऽधिपतये इत्यादि बलिं दद्यात् ओं मां सामाय प्रेताधिपतये दण्डह-स्ताय महिषवाहनाय सायुधायेत्यादिना संपूज्य ओं मां यमाय प्रेताधिपतये इत्यादिना बलिं दद्यात्-ओं क्षां निर्ऋतये रक्षोऽधिपतये असिहस्तायाश्ववा-हनाय सपरिवाराय इत्यादिना संपूज्य ओं क्षां निर्ऋतये रक्षोऽधिपतये इत्यादिना बलिं दद्यात् ॥

ओं वां वरुणाय जलाधिपतये पाशहस्ताय मकर-वाहनाय सायुधाय इत्यादिना संपूज्य ओं वां वरु-णाय जलाधिपतये इत्यादिना बलिं दद्यात् ॥

ओं यां वायवे प्राणाधिपतये हरिणवाहनायांकुश-हस्ताय इत्यादिना संपूज्य ओं यां वायवे प्राणा-

धिपतये इत्यादिना बलिं दद्यात् ॥ ओं सां सोमाय यक्षाधिपतये गदाहस्ताय नरवाहनाय सपरिवाराय इत्यादिना संपूज्य ओं सां सोमाय यक्षाधिपतये इत्यादिना बलिं दद्यात्॥ओं हां ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनाय सपरिवाराय इत्यादिना पूर्व्ववत् संपूज्य ओं हां ईशानाय भूताधिपतये इत्यादिना बलिं दद्यात् ॥ इन्द्रेशानयोर्मध्ये ॐ ब्रह्मणे प्रजाधिपतये हंसवाहनाय पद्महस्ताय सपरिवाराय इत्यादिना संपूज्य बलिं दद्यात् ॥ नैर्ऋतवरुणयोर्म्मध्ये ओं ह्रीं अनन्ताय नागाधिपतये चक्रहस्ताय रथवाहनाय सपरिवाराय इत्यादिना संपूज्य ओं ह्रीं अनन्ताय नागाधिपतये सायुधाय इत्यादिना बलिं दद्यात् ॥

ततःसर्व्वत्र सामिषान्नेन । सर्व्वभूतबलिं दद्यात् ।
ततः—अधिष्ठातृदेवताभ्यो बलिञ्च स्मारयेत्ततः।
चतुः षष्टियोगिनीभ्यो डाकिनीभ्योऽपि संदिशेत्॥

उक्त इन्द्रादि दश दिक्पालोंकी पूजाका क्रम यथा—पूर्व्वकी ओर "ॐलां इन्द्राय सुराधिपतये" इत्यादि मंत्रसे पाद्यादि उपचारद्वारा अर्च्चना करके "ओं लां इन्द्राय सुराधिपतये" इत्यादि मंत्रसे सामिषान्नद्वारा बलिप्रदान करै

इस प्रकार इन्द्र, अग्नि, यम, निर्ऋति, वरुण, वायु, कुबेर, ईशान, ब्रह्मा और अनन्त इन दशदिक्पालोंकी पूजा करै इन सम्पूर्ण देवताओंकी पूजाका मंत्र और बलि मन्त्र मूलमें स्पष्टरूपसे लिखा है उसको देखकर समझा जायगा इसप्रकार दिक्पालोंकी पूजा और बलि प्रदानकर सर्व्वभूत बलि प्रदान करै सामिष अन्नद्वारा सम्पूर्ण देवताओंको बलिप्रदान करै इसके उपरान्त अधिष्ठातृ देवता चौंसठ योगीनी और डाकिनियोंको बलिप्रदान करै ।

अथ पूजासामग्रीं समीपे दूरे चोत्तरसाधकं संस्थाप्य मूलान्ते ह्रीं फट् शवासनाय नमः।इति शवं संपूज्य ह्रींफडन्तमूलमुच्चार्य्य अश्वारोहणक्रमेण शवोपर्य्युपाविश्य स्वपदतले कुशान् दत्वा शवकेशान् प्रसार्य्य झुटिकां बध्वा गुरुं गणपतिं देवीञ्च नमस्कृत्य प्राणायामषडंगन्यासौ कृत्वा पूर्व्ववत् वीरार्द्दनमंत्रेण दशदिक्षु लोष्ठान् निक्षिप्य संकल्पं कुर्य्यात्।अद्येत्यादि अमुकदेवतायाःसन्दर्शनकामः अमुकमंत्रस्यामुकसंख्यजपमहं करिष्ये इति संकल्प्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य स्ववामतः शवसमीपे अर्घ्यपात्रादिकं संस्थाप्य शवझुटिकायां पीठपूजां कृत्वा षोडशोपचारैर्द्दशोपचारैः पञ्चोपचारैर्वा देवीं संपूज्य शव-

मुखे देवीं गन्धादिना सन्तर्पयेत् । ततः शवादुदुत्थाय सम्मुखे गत्वा मंत्रं पठेत् ॥

ॐ वशो मे भव देवेश मम वीरसिद्धिं देहि देहि महाभाग कृताश्रयपरायण । ततः शवचरणौ पट्टसूत्रेण बद्धा मूलेन दृढं बन्धयेत् ॥

ओं मद्वशो भव देवेश वीरसिद्धिकृतास्पद ।
भीमभीरुभयाभावभवमोचन भावुक ॥
त्राहि मां देवदेवेश शूराणामधिपाधिप ॥
इत्यनेन शवस्य पादमूले त्रिकोणं लिखेत् ॥

ततः शवोपर्य्युपविश्य हस्तद्वयं पार्श्वयोः प्रसार्य्य तदुपरि कुशान्दत्वा तत्र स्वपादौ निधाय पुनः प्राणायामत्रयं कृत्वा शिरसि गुरुं विभाव्य हृदये देवीं ध्यात्वा ओष्ठौ संपुटौ कृत्वा विहितमालया मौनीभूत्वा विगतभीर्जपेत् । अत्र श्मशानसाधनक्रमेण जपः कार्य्यः॥

अनन्तर साधक अपने समीपमें पूजाकी सामग्री और कुछ दूर उत्तर साधकको स्थापनकर आदिमें मूलमंत्र और फिर "ह्रीं फट् श्मशानाय नमः" इस मंत्रसे शवकी अर्चना करै । फिर पहले मूलमंत्र पश्चात् "ह्रीं फट्" यह मंत्र उच्चारणपूर्व्वक घोडेपर चढनेकी सामान शवकी पीठपर बैठकर अपने पादतलमें कुछेक कुश निक्षेप करै और शवके केश फैला

कर चोटी बंधनपूर्व्वक गुरु गणपति और देवीको नमस्कार करै फिर प्राणायाम और षडंगन्यास करके पूर्व्वोक्त वीरार्दन मंत्रसे दशों ओर लोष्ट्रा निक्षेपकरै इसके उपरांत मूलमेंलिखित वाक्यानुसार संकल्प करके "ह्रीं आधारशक्तिकमलासनाय नमः" इस मंत्रसे आसनकी पूजा करै फिर अपने वाम भागमें शवके समीप अर्घ्य स्थापन करै शवकी चोटीमें पूजा पद्धतिकी लिखित प्रणालीद्वारा पीठ पूजा करै अनन्तर साधक अपने विभवके अनुसार षोडशोपचार दशोपचार अथवा पञ्चोपचारसे इष्ट देवताकी पूजा करके शवके मुखमें सुगंधित जल द्वारा देवीका तर्पण करै अनन्तर शवसे उठ शवके सन्मुख खडा हो मंत्र पाठकरे हे देवेश! तुम मेरे वशीभूत होकर सिद्धि प्रदान करो। हेमहाभाग! जो तुम्हारा आश्रय ग्रहण करे तुम उसके प्रति अनुरक्त रहो इसके पश्चात् पट्टसूत्रद्वारा शवके दोनों चरण बाँधकर मूलमंत्रसे शवका शरीर दृढरीतिसे बाँधे। हे देवेश! तुम मेरे वशीभूत होओ तुम्हीं वीरसाधन कार्य्यके प्रधान आश्रय हो भयंकराकृति डरेहुएका भय दूर करनेवाले और मंगल प्रदहो तुम्हीं साधकोंकी संहार वृत्ति निवारण करतेहो हे देव देवेश! तुम्हीं शूरगणोंके अद्वितीय अधीश्वर हो हमारी रक्षा करो इन सब वाक्योंसे शवके पादमूलमें त्रिकोण यंत्र लिखे फिर शवके ऊपर बैठकर शवके दोनों हाथ दोनों पार्श्वमें फैलाकर उसके ऊपर कुश बिछाकर साधक उन बिछे हुए

कुशोंके ऊपर अपने दोनों पैर रखकर फिर तीन प्राणायाम कर शिरःस्थित पद्ममें गुरुदेवकी और अपने हृदयमें देवीकी चिंता करते करते दोनों ओष्ठसंपुटवत् विहित मालाद्वारा निर्भय चित्तसे मौनहोकर श्मशानसाधनके क्रमसे जप करै।

यद्यर्द्धरात्रपर्य्यन्तं किञ्चिन्न लक्ष्यते । तदा पूर्व्ववत् सर्षपतिलविकिरणं सप्तपदगमनञ्च कृत्वा जपं कुर्य्यात् । भये जाते सति एवं पठेत्—

चलच्छवाद्भयं नास्ति भये जाते वदेत्ततः ।
यत् प्रार्थय बलित्वेन दातव्यं कुञ्जरादिकम् ॥
दिनान्तरे च दास्यामि स्वनाम कथयस्व मे ।
इत्युक्त्वा संस्कृतेनैव निर्भयश्च पुनर्जपेत् ॥
ततश्चेन्मधुरं वक्ति वक्तव्यं मधुरं ततः ।
ततः सत्यं कारयित्वा वरञ्च प्रार्थयेत्ततः ॥
यदि सत्यं न कुरुते वरं वा न प्रयच्छति ।
तदा पुनर्जपेद्धीमानेकाग्रमानसस्तथा ॥

अस्यार्थः—यदि जपकाले आकाशगत्या कुञ्जरादिकं प्रार्थयते तदा दिनान्तरे दास्यामि मम स्थाने स्वनाम कथय इत्युक्त्वा पुनर्जपेत् । यदि स्वनाम मधुरं कथयति तर्हि त्वं अमुक इति सत्यं कुरु । कृते सत्ये वरं प्रार्थयेत् । यदि कदाचिदपि सत्यं न करोति वरं वा न प्रयच्छति तदा पुनर्जपेत् ॥

वीरसाधन ।

तथा च-सत्यं कुर्य्याद्वरं लब्ध्वा संत्यजेच्च जपादिकम्।
फलं जातमिति ज्ञात्वा झुटिकां मोचयेत्ततः ॥
शवं प्रक्षाल्य संस्थाप्य मोचयेत्पादबन्धनम् ।
पादचक्रं मोचयित्वा पूजाद्रव्यं जले क्षिपेत् ॥
शवं जले तु गर्त्ते वा निक्षिप्य स्नानमाचरेत् ॥

इसप्रकार जप करनेपरभी यदि अर्द्धरात्रिपर्य्यन्त कुछ न दिखाई दे, तो पहलेकी समान सरसों और तिल बखेर कर अधिष्ठित स्थानसे सात पैर चलकर फिर जप आरंभ करे यदि जपके समय किसी प्रकारका भय उपस्थित हो अर्थात् आकाशसे यदि कोई बलिकी प्रार्थना करे तो उससे इसप्रकार कहै कि "दिनान्तरमें तुमको कुञ्जरादि बलिप्रदान करूंगा तुम कौन हो और तुम्हारा क्या नाम है यह मुझसे कहो" इसप्रकार उत्तर देकर फिर जप आरम्भ करै फिर यदि मधुर वाक्यसे अपना नाम बतावे तो पुनर्वार साधक कहै कि तुम "मुझको वर प्रदान करोगे इसप्रकार प्रतिज्ञा करो" इस प्रकार प्रतिज्ञा बद्धकर साधक वरकी प्रार्थना करै यदि प्रतिज्ञा पाशमें न बँधे और वरप्रदान न करै तो पुनर्व्वार स्थिरचित्तसे जप करै किन्तु यदि प्रतिज्ञा करके वर देनेमें सम्मत हो तो फिर जप न करै अभिलषित वर ग्रहण कर "मेरी कार्य्यसिद्धि हुई" इसप्रकार जान शवकी चुटिया छोडकर शव प्रक्षालन और शवको स्थानान्तरमें स्थापन कर शवके पैर खोलदे और पूजा

द्रव्य जलमें डाल शवको जलमें अथवा भूमिके गढेमें डालकर स्नान करै।

ततस्तु स्वगृहं गत्वा बलिं दद्याद्दिनान्तरे ॥
बलिमंत्रस्तु—अग्निमरात्रौ येषां यजमानोऽहं तेगृह्णन्तिवमम् ॥ अथ येर्याचितानश्वान् नरकुञ्जरशूकरान् । दत्त्वा पिष्टमयानन्ते कर्त्तव्यं समुपोषणम् ॥ ततः परेऽह्नि नित्यक्रियां कृत्वा पञ्चगव्यं पिबेत् । पंचविंशतिसंख्याकान् ब्राह्मणानपि भोजयेत् ॥ सप्तपंचविहीनान्वा क्रमेणैव दशावधि । ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमं स्थलम् ॥

फिर साधक अपने घर जाकर दिनान्तरमें पूर्व्व प्रतिज्ञा करी हुई कुञ्जरादि बलि प्रदान करै बलिका मंत्रमूलमें लिखाहै यदि कोई देवता, कुञ्जर, अश्व, नर अथवा शूकरके बलिकी प्रार्थना करै तो देवताकी प्रार्थनानुसार पिठी निर्म्मित स्वस्व अभिलषित बलि प्रदान कर साधक उपवासी रहै दूसरे दिन साधक प्रातःकृत्यादि नित्य कर्त्तव्य कार्य्य समाप्त कर पञ्चगव्य पान करै और पच्चीस ब्राह्मणोंको भोजन करावे असमर्थहोनेपर इन पञ्चविंशतिमेंसे सात अथवा पांच छोडकर अपनी शक्तिके अनुसार ब्राह्मणोंको भोजन करावै दश पर्य्यन्त ब्राह्मण संख्या होनेपरभी कोई दोष नहीं होता इसके उपरान्त स्नान और भोजन कर उत्तम स्थानमें वास करै।

यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।
तेन चेन्निर्धनत्वं स्यात्तदा देवी प्रकुप्यति ॥
त्रिरात्रं वाथ षड्रात्रं नवरात्रन्तु गोपयेत् ।
स्त्रीशय्यां यदि गच्छेत्तु तथा व्याधिं विनिर्दिशेत् ॥
गीतं श्रुत्वा च बधिरो निश्चक्षुर्नृत्यदर्शनात् ।
यदि व्यक्तिदिने वाक्यं तदास्य मूकता भवेत् ॥
पञ्चदशदिनं यावद्देहे देवस्य संस्थितिः ।
न स्वीकार्य्ये गन्धपुष्पे बहिर्याति यदा तदा ॥
तदा वस्त्रं परित्यज्य गृह्णीयाद्वसनान्तरम् ।
गोब्राह्मणविनिन्दाञ्च न कुर्य्याच्च कदाचन ॥
दुर्ज्जनं पतितं क्लीबं न स्पृशेच्च कदाचन ।
देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेच्छुचिः ॥
प्रातर्नित्यक्रियान्ते च बिल्वपत्रोदकं पिबेत् ।
ततः स्नात्वा तु गंगायां प्राप्ते षोड़शवासरे ॥
स्वाहान्तं मंत्रमुच्चार्य्य तर्पणान्ते नमः पदम् ।
एवं शतत्रयादूर्ध्वं देवान् सन्तर्पयेज्जलैः ॥
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ।
इत्यनेन विधानेन सिद्धिं प्राप्नोति साधकः ॥
इह भुक्त्वा वरान् भोगानन्ते याति हरेः पदम् ॥

यदि ब्राह्मण भोजन न हो तो साधक निर्धन होता है वि-
शेषकर देवीभी कुपित होती है इसप्रकार मंत्र सिद्धि होनेपर

तीन रात्रि छै रात्रि अथवा नौ रात्रिपर्य्यन्त गुप्त रक्खे किसी प्रकारभी मंत्र सिद्धिका विषय प्रकाश न करै । मंत्र सिद्धि होने पर यदि साधक स्त्रीशय्यामें गमन करै, तो साधकको व्याधि होती है । यदि गीत श्रवण करै तो बहरा होता है और नृत्य देखनेसे अन्धा होता है और दिनमें किसीके साथ बात करै तो साधक मूक होता है। पन्द्रह दिन इसप्रकार सर्वकर्म्म परि-त्याग करके रहे कारण कि साधकके शरीरमें पन्द्रह दिनतक देवीका वास रहता है उक्त कितनेही दिनतक साधक गन्ध अथवा पुष्प ग्रहण न करै और जिस समय बाहरको जाय तब अपने पहरनेके वस्त्र त्यागकर दूसरे वस्त्र पहरे । गो और ब्राह्मणकी निन्दा न करै दुर्ज्जन पतित और क्लीबको स्पर्श न करै नित्य शुद्ध कलेवरसे देवता गो और ब्राह्मणको स्पर्श करै मंत्र सिद्धिके सोलहवें दिन गंगामें स्नान करनेके अनन्तर मूलके लिखित मंत्रसे तर्पण करै तीनसौसे अधिक देवी तर्पणके उपरान्त देव तर्पण करै स्नान और देवी तर्पणके न होनेसे देवतर्पण नहीं होता इसप्रकार करनेसे सिद्धि लाभके अनन्तर इस लोकमें सुखभोगकर अन्तमें हरिपद प्राप्त करसकता है ।

दूतीयोगः ।

तत्रादौ विजयास्वीकारः ।

तथा च-सम्बिदासवयोर्मध्ये सम्बिदेव गरीयसी ।
सम्बित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः ॥

कर्त्तव्यश्च महापूजा करणीया सुनिश्चितैः ।
अयं प्रयोगः पूजादौ कुलीनैः कर्त्तव्यः ॥

प्रथम विजया स्वीकार करनी चाहिये सम्विदा और आसव इन दोनोंमें सम्विदाही श्रेष्ठ है अतएव पूजाके पहले सम्विदाका प्रयोग साधकको करना अवश्य कर्त्तव्य है साम्विदा ग्रहणपूर्व्वक स्वस्थ चित्त हो महापूजा करै कौल पुरुषको पूजाके पहलेही यह सम्विदाप्रयोग करना चाहिये ।

अन्यत्रापि आनन्देन विना भ्रंशो न च तृप्यन्ति देवताः।

अन्यत्र लिखा है आनन्दके विना भ्रष्ट होता है आनन्दके विना देवता प्रसन्न नहीं होते अतएव सम्विदा पानमें आनन्दित होकर पूजा करनी चाहिये ।

साच चतुर्व्विधा—ब्राह्मणीक्षत्रियावैश्या शूद्रेति
शुक्लरक्तपीतकृष्णपुष्पभेदैः ।
तासां शुद्धिस्तु विजयाकल्पे—
सम्विदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे ।
भैरवाणाञ्च तृप्त्यर्थं पवित्रा भव सर्व्वदा ॥
ओं ब्राह्मण्यै नमः स्वाहेति शोधयेत् ।
सिद्धमूलकरे देवि हीनबोधप्रबोधिनि ।
राजपुत्री वशंकारि शक्रकण्ठत्रिशूलिनि ॥
ऐंक्षत्रियायै नमः स्वाहा शोधयेदपरां ततः ।
आज्ञानेन्धनदीप्ताग्निज्ञानाग्निज्वलरूपिणी ॥
आनन्दस्याहुतिं मत्वा सम्यग्ज्ञानं प्रयच्छ मे ।
ह्रीं वैश्यायै नमःस्वाहा वैश्याञ्च शोधयेत् पराम्

नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि ।
त्रैलोक्यविजये मातः समाधिफलदा भव ॥
श्रीं शूद्रायै नमः स्वाहेति शूद्राञ्च परिशोधयेत्॥
ततः सर्व्वासां शोधनम् ॥
अमृते अमृतोद्भवे अमृतवर्षिणी पदं ततः ।
अमृतमाकर्षय द्वन्दं सिद्धिं देहि ततः परम् ॥
अमुकं मे ततोब्रूयाद्वशमानय ततः परम् ।
द्विठान्तोऽयं मनुः प्रोक्तः सर्व्वासामिह शोधने॥
ज्ञाने प्रत्येकेन तत्तन्मंत्रेण प्रत्येकं शोधयेत् ॥
अज्ञानेन त्वनेन शोधयेत् ॥

यह सम्विदा चार प्रकारकीहै—शुक्लपुष्पा सम्विदा ब्राह्मणी रक्तपुष्पा क्षत्रिया, पीत पुष्पा वैश्या और कृष्ण पुष्पा संविदा शूद्रा है इन चारों प्रकारकी सम्विदाओंका शोधन मंत्र विजयाकल्पमें यथाक्रमसे लिखा है यथा—"सम्विदे ब्रह्मसम्भूते" इत्यादि ऊपर लिखित मंत्रसे ब्राह्मणी सम्विदाका शोधन करै "सिद्ध मूलकरे देवि" इत्यादि मंत्रसे क्षात्रिय साम्विदाका शोधन करै "अज्ञानेंधनदीप्ताग्नि" इत्यादि मंत्रसे वैश्या सम्विदाका शोधन करै और "नमस्यामि नमस्यामि" इत्यादि मूल लिखित मंत्रसे शूद्रा सम्विदाका शोधन करै सम्विदा कौन जाति है यदि यह न जानसके तो "अमृते अमृतोद्भवे" अमृत वर्षिणी अमृतमाकर्षयाकर्षय सिद्धिं देहि अमुकं मे वशमानय

स्वाहा" इस मंत्रसे शोधन करै यह सर्व्वजातीय सम्विदाओंके शोधनका मंत्र है ।

उत्तरतंत्रे—मूलमंत्रं सप्तवारं तस्योपरि नियोजयेत् ।
आवाहनादि मुद्राश्च धेनुं योनिं ततः परम् ॥
दिग्बन्धनं छोटिकाभिस्तालत्रयपुरस्सरम् ।
दिव्यदृष्ट्या पार्ष्णिघातैःसर्व्वान्विघ्नान्निरस्य च॥
सप्तधा तर्पयेद्ब्रह्मरन्ध्रे मूलं जपेन्मनुम् ।
गुरुपद्मे सहस्रारे तथा संकेतमुद्रया ॥
त्रिवारं तर्पयेद्भक्त्या साधकः सिद्धिमानसः ॥
मूलमिष्टदेवतामंत्रमुच्चार्य अमुक देवतां तर्पयामि । एवं गुरुञ्च तर्पयेत् । ततः संकेतमुद्रया स्वीकुर्य्यात् ।

यथा —ऐं वद वद पदं ब्रूयाद्वाग्वादिनि पदं ततः ।
मम जिह्वाग्रे स्थिरेतिभव सर्वपदं ततः ।
सत्व वशङ्करि स्वाहा मन्त्रेण जुहुयान्मुखे ॥

इस सम्विदाके ऊपर सात बार मूल मंत्र जप करना चाहिये । फिर आवाहनादिमुद्रा, धेनुमुद्रा, योनिमुद्रा, तीन ताल, दिग्बंधन, चुटकी, पार्ष्णि, आघात और दिव्य दृष्टिसे सब भय दूर करे । इसके उपरान्त सात बार मूल मंत्र जप पूर्व्वक ब्रह्मरन्ध्रमें मूल देवताका तर्पण कर, तत्व मुद्राद्वारा सहस्रार पद्ममें भक्ति पूर्वक तीन बार गुरुतर्पण करे । मूलमंत्र-

अर्थात इष्टदेवताका मंत्र उच्चारण पूर्वक 'अमुकदेवतां तर्पयामि' कहकर तर्पण करना चाहिये अनन्तर "ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिराभव सर्वसत्ववशंकारि स्वाहा" यह कहकर संकेतमुद्रा और तत्व मुद्रामें विजया स्वीकार करै ।

विना हेतुकमासाद्य क्षोभयुक्तो महेश्वरः ।
न पूजां हवनं कुर्य्यान्न ध्यानं नापि चिन्तनम् ॥
तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम् ॥
पीत्वेति विजयामेव प्रकरणात् ॥

सम्बिदाके विना पूजा करनेसे महेश्वर क्षुब्धहोते हैं। अथवा सम्बिदा विना ग्रहण किये पूजा होम ध्यान, चिन्ता अथवा जप न करे । भोजन और सम्बिदा ग्रहण करके परमेश्वरीकी पूजा करै । पीत्वा प्रकरणसे यहां विजयाका ग्रहण है ।

यजनप्रकारः ।

तत्र रात्रौ प्रहरे गते ताम्बूलपूरितमुखः स कुलनायिकां पूजयेत् ॥
याममात्रगते रात्रौ कुलगेहं ततः पुमान् ।
ताम्बूलपूरितमुखो धूपामोदसुगन्धितः ॥
रक्तचन्दनादिग्धाङ्गो रक्तमाल्यानुसेवितः ।
रक्तवस्त्रपरीधानो लाक्षारसगृहं गतः ॥
रक्तमाल्येन संवीतो रक्तपुष्पाविभूषितः ।
पञ्चीकरणसंकेतैः पूजयेत्कुलनायिकाम् ॥

एकप्रहर रात्रि बीतनेपर ताम्बूल मुखमें धारणकर कुलनायिकाकी पूजा करै। तंत्रान्तरमें भी लिखाहै कि रात्रिके एकप्रहर बीतनेपर साधक ताम्बूल मुखमें धारणपूर्वक सब गात्र सुगंधित कर, रक्तचन्दन चर्चित, रक्तवसनधारी रक्तमाल्यसे विभूषित और रक्तपुष्पसे अलंकृत हो, धूप गंधद्वारा सुगंधित कियेहुए लाक्षावर्णकी समान रक्तवर्ण कुलगृहमें प्रवेशकर पंचीकरण संकेतसे कुलनायिकाकी पूजाकरै ।

कुलनायिका ।

नटी कपालिका वेश्या पुक्कशी नापिताङ्गना ।
रजकी रञ्जनी चैव सैरिन्ध्री च सुवासिनी ॥
घटिका खटिका चैव तथा गोपालकन्यका ।
विशेषवैदग्ध्ययुताः सर्व्वा एव कुलाङ्गनाः ॥
गुरुभक्ता देवभक्ता घृणालज्जाविवर्ज्जिताः ।
संगोपनरताः प्रायस्तरुण्यः सर्व्वसिद्धिदाः ॥
अक्षताचारसम्पन्नां शीलसौभाग्यशालिनीम् ।
सदनुष्ठाननिरतां सात्त्विकीं भक्तिसंयुताम् ॥
कालुष्यरहितां कुर्य्यात्समयां भक्तवत्सलाम् ।
चातुर्य्यौदार्य्यदाक्षिण्यकरुणादिगुणान्विताम् ॥
रूपयौवनसम्पन्नां शीलसौभाग्यशालिनीम् ।
अथ वा तत्क्षणायातां मदनानलतापिताम् ॥
विलिप्तां रक्तगन्धेन रक्ताम्बरविभूषिताम् ।

सुगन्धिरक्तकुसुमां सर्व्वाभरणभूषिताम् ॥
सुधूपधूपितां तन्वीं दूतीकर्म्मसु योजयेत् ॥

कुलनायिका–यथा,–नटी, कपालिका, वेश्या, पुक्कशी, नापितांगना,(नाउनि)धोबन, रजंनी,सैरिन्ध्री,सुवासिनी,घटिका खटिका, और गोपालकन्या, इनको कुलनायिका कहते हैं। विशेषकर कुलाङ्गना यदि भलीभांति चतुर, गुरुभक्त, देवभक्त, घृणा लज्जा रहित, गोपनरत और युवती हो, तो सब सिद्धि होसकती है। अक्षताचारसंपन्न (क्षत रहित आचारवाली) सुशील, सौभाग्य शालिनी, अच्छे अनुष्ठानमें निरत, सत्त्वगुणको अवलम्बन करनेवाली, भक्तिमती, पापरहित, भक्त वत्सल, चतुर, औदार्य्य दाक्षिण्यादि गुणयुक्त, रूप यौवन शालिनी, ऐसी रमणीको दूती कार्यमें आवाहन किया जाता है। अथवा कामाग्निसे संतप्त, तत्काल आई हुई, रक्ताम्बरसे विभूषित, रक्त गंधसे लिप्त, सुगंधित रक्त फूलोंसे सज्जित, सब गहनोंसे भूषित सुंदरी रमणीको भी दूती कार्यमें नियक्त किया जाता है।

मतान्तरे–नटी कपालिका वेश्या रजकी नापिताङ्गना।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥
मालाकारस्य कन्या च नव कन्याःप्रकीर्तिताः।
ब्राह्मणी तु ब्राह्मणविषयम् ।

मतान्तरमें लिखा है कि नटी, कपालिका वेश्या, रजकी नाईकी कन्या, ब्राह्मणी, शूद्रकन्या, गोपालकन्या, मालीकी

कन्या यह नौ प्रकार की कन्या लता साधनमें श्रेष्ठ हैं। इनमें ब्राह्मणी ब्राह्मणके अतिरिक्त दूसरेकी शक्ति नहीं होसकती।

एवं भूतां यजेत्तान्तु प्रसूनतूलकोपरि ॥
व्यङ्गाङ्गीं विकृतांगीं वा सविकल्पकमानसाम् ॥
वर्षीयसीं पापरतां हूंकारीमर्थलोलुपाम् ।
अभक्तमानसां दीनां वर्ज्जयेत्साधकोत्तमः ॥

ऐसी कन्याको पुष्पशय्यापर स्थापनपूर्वक साधक पूजा करै। परन्तु विकल अंगवाली, टेढे अंग वाली, संदिग्ध चित्त वृद्ध पापमें निरत बातका उलटकर उत्तरदेनेवाली अर्थ लोलुप अर्थात् लालचन अभक्तचित्त और कातर रमणीको इससाधनमें त्यागदे।

अर्थाद्वा कामतो वापि सौख्यादपि च यो नरः।
लिंगयोनिरतो मन्त्री रौरवं नरकं व्रजेत् ॥

जो पुरुष किसी प्रयोजन सिद्धिके लिये, सुखके लिये, अथवा कामके वशहोकर स्त्रीसंसर्गमें निरत होताहै वह रौरव नरकमें जाताहै।

उपदिष्टा यदा देवि तदा पुत्री तु कन्यका।
पूजार्हा च यदा देवि तदा माता न संशयः॥

जब शक्तिको लाकर उपदेशदे, तब उसको कन्या स्वरूप जाने। और जब पूजा करे माताकी समान जाने।

एवम्विधां कुलकन्यामानीय उद्वर्त्तनादिकं विधाय तूलकोपरि नियोजयेत्।

ऐसी कुलकन्याको लाय उसके उबटन आदि लगाय शय्याके ऊपर बैठाले ।

तथा–तमानीय कुलं सम्यगुद्वर्त्तनमनन्तरम् ।
स्नानशुद्धदुकूलादि ह्यनुलेपनशोभिताम् ॥
अलकृतां गतश्रान्तिं स्वागतं चासनं तथा ।
निवेश्य तूलिकामध्ये नानापुष्पसुगन्धिना ॥
चन्दनागुरुकर्पूरकस्तूरीकुंकुमादिभिः ।
समाकीर्णे विवेश्याथ पूजयेत्कुलनायिकाम् ॥
ततो भूतशुद्धयादिकं विधाय तत्तत्कुलांगन्या संकुर्य्यात् तद्यथाः–
अंगन्यासकरन्यासौ प्राणायामं ततः परम् ।
विधाय मातृकान्यासं कुलांगेऽपि प्रविन्यसेत् ॥

सुराशोधन ।

घटं धृत्वा पठेत् ।

एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
सूर्य्यमण्डलसंभूते वरुणालयसम्भवे ।
अमाबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॥
तत ओं वां वीं वूं वैं वौं वः ब्रह्मशापविमोचितायै

सुधादेव्यै नमः ॥ इति तदुपरि दशधा जपेत्।
तत ओं शां शीं शूं शैं शौं शः शुक्रशापविमोचितायै सुधादेव्यै नमः । इति तदुपरि दशधा जपेत्।

एवं ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः कृष्णशापं
विमोचयामृतं श्रावय स्वाहेति दशधा
जपेत् । ततो मूलमंत्रं तदुपर्यष्टधा जप्त्वा दे-
वतामयं विभावयेत् । तत्रद्रव्यदानन्तु शूद्रस्यैव ।
न दद्याद्ब्राह्मणो मद्यं महादेव्यै कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भावयेत् ॥

उबटनकर स्नानके पीछे रक्तवस्त्रपहिराय और गंधादि द्वारा अनुलेपनपूर्वक भूषण पहिराय जब देखे कि श्रम दूर होगया तब आसन देकर स्वागत प्रश्न पूछे फिर विविध सुगंधित पुष्पोंसे अलंकृत, चन्दन, अगर, कर्पूर, कस्तूरी, कुंकुम इत्यादि युक्त शय्याके ऊपर इसकुलकन्याको बैठाल, भूतशुद्धि इत्यादि समापनपूर्वक उसके शरीरमें मातृका न्यास अंगन्यास, करन्यास इत्यादि करै । अंगन्यास, करन्यास प्राणायाम इत्यादि समाप्तकर कुलकामिनीके अंगमें यह सब न्यास करै । अनन्तर पंचमकार सुरालाकर "एकमेव परं ब्रह्म" इत्यादिमंत्रसे सुराशोधन करै । परब्रह्म एकही है, वही स्थूल सूक्ष्महै, इससत्यसे कचकी ब्रह्महत्या नाश करता हूं । सूर्यमण्डलसे समुद्भूत होनेवाली, वरुणके आलयसे प्रगट होनेवाली अमाबीजमय देवी शुक्रके शापसे मुक्तहो । वेदोंका ओंकारमय

बीज यदि ब्रह्मानन्दमयहै तो उस सत्यसे ब्रह्महत्या दूर होजाय। अनन्तर इस द्रव्यके ऊपर आठवार मूल मंत्र जपकर उसको देवता जाने। यह मद्यपान शूद्रके लिये विहित हुआ है। श्रीक्रममें लिखाहै कि, ब्राह्मण कभी महादेवीको मद्य प्रदान न करै। कोई ब्राह्मण वामाचारकी इच्छासे मद्यमांस भक्षण न करै।

यत्रासवमवश्यन्तु ब्राह्मणस्तु विशेषतः।
गुडार्द्रकं तदा दद्यात्ताम्रे वारिसृजेन्मधु॥
देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत्।
एतद्द्रव्यन्तु शूद्रस्य नान्येषान्तु कदाचन॥
वैश्यस्य माक्षिकं शुद्धं क्षत्रियस्य तु साज्यकम्।
ब्राह्मणस्य गवांक्षीरं ताम्रे वारि सृजेन्मधु॥

नारिकेलोदकं कांस्ये सर्व्वेषां द्रव्यशोधनम्। क्षत्रियवैश्ययोस्तु गौडीमाध्वी च दातव्या तत्र तयोरधिकारात्। तदभावेऽनुकल्पविधानम्।

तथा च—गोक्षीरं ब्राह्मणो दद्याद्द्रव्यमाज्यञ्च बाहुजः।
वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्ट्यादिकं पुनः॥
तेन शूद्रस्य नानुकल्पः।

जिस स्थानमें ब्राह्मणको अवश्यही मद्यदेनेकी विधिहै वहां गुड अदरक और तांबेके पात्रमें मधु प्रदान करै। यह द्रव्य देवीके दक्षिण भाग और चक्रके पार्श्वमें रखकर निवेदन करै। यह द्रव्यदान शूद्रके लिये विहित है। अन्यकिसीके

पक्षमें नहीं । वैश्यको आज्य (घृत) ब्राह्मणको गोदुग्ध अथवा तांबेके पात्रमें दिया हुआ मधु मद्यके स्थानमें देना कहाहै । अथवा कांसीके पात्रमें नारियलका जल सबजाति पक्षमें मद्यका अनुकल्प स्वरूप हो सकताहै । फलतः क्षत्रिय और वैश्य गौडी वा माध्वी सुरा प्रदानकर सकते हैं । यह दोप्रकार की सुरा प्राप्त नहोनेसे वैश्य और क्षत्रिय को अनुकल्प प्रदान करना चाहिये । ब्राह्मण गायका दूध प्रदान करै क्षत्रिय आज्य द्रव्य प्रदान करै वैश्य शहत प्रदान करे शूद्र पैष्टिक इत्यादि समस्तही मद्यप्रदान कर सकतेहैं अतएव शूद्रके अनुकल्पका विधान नहीं है ।

जलं क्षीरं घृतं भद्रे मधु मैरेयमैक्षवम् । पौष्पं तरुभवं धान्यसम्भवं तक्रनिर्म्मित म् ॥ सहकार-भवं देवि त्रिविधं बहुभेदकम् । मादकं धर्म्म सम्भेदाद्वर्ज्यमासीत्सुलोचने ॥ ज्ञानेन संस्कृतं तत्तु महापातकनाशनम् । तद्दाने पातकाभावो दिव्य युतं हि तत् माकन्दजलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः । अमादकत्वादेवेशि ऐक्षवं सेव्यते बुधैः ॥

एतेन क्षत्रियादिभिरमादकं द्रव्यं सेव्यं
मादकस्य पापहेतुत्वं उक्तम् ।

तंत्रमें लिखा है, जलोत्पन्न, क्षीरोत्पन्न, घृतोत्पन्न, मैरेय, ईखसे उत्पन्न, पुष्पोत्पन्न, वृक्षोत्पन्न, धान्योत्पन्न, तक्रसंभूत

आमकी बनी मद्य इस प्रकार अनेक भांतिकी हैं, मादक द्रव्य धर्मकी हानि करनेवालाहै, इसलियेही यह निषिद्ध है। किन्तु मादक द्रव्यका ज्ञानद्वारा संस्कार होनेपर उसमद्यके प्रदानकरनेमें पाप नहीं होता। पर कोई २ कहते हैं कि मद्यप्रदान दिव्यभाव विषयक—अर्थात् दिव्यभावसे मद्य प्रदान करनेमें दोष नहीं है ऐसा कहागया है कि ब्राह्मणोंको माकंद जलसे प्रगट हुई मद्य सेवन करनी चाहिये। क्योंकि इसमें वैसी मादकता नहीं है। देखाजाता है कि मादकता हीन जानकर पण्डितगण इक्षुसंभूत मद्यपान करते हैं, इस वचनसे निश्चय होता है कि क्षत्रियोंके पक्षमें मादकता हीन मद्य सेवनीयहै। जो मद्य अतिशय मत्तता करनेवाली है, वही पापका हेतु कही गई है।

मद्यं मांसं विना वत्स यत्किञ्चित्कुलसाधनम्।
शक्त्यै दत्वा ततः शेषं गुरवे तन्निवेदयेत्॥
तदनुज्ञां मूर्ध्नि कृत्वा शेषमात्मनि योजयेत्।
तेन क्षत्रियादीनां मद्यस्य दानेऽधिकारः न पाने॥

तंत्रान्तरमें लिखाहै कि मद्य और मांसके अतिरिक्त अन्य जो कुछ कुलद्रव्यहैं, वह सब शक्तिको प्रदानपूर्वक अवशिष्ट गुरुको निवेदन करै। अनन्तर गुरुकी आज्ञा मस्तक पर धारणकर शेष अंश आप पान भोजन करै। इससे जाना-

जाताहै कि क्षत्रियादिकोंके लिये मुख्य द्रव्य दानमें अधिकार है, किन्तु पान करनेमें अधिकार नहींहै ।

यत्तु—पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥
तच्च चतुर्थाश्रमिपरम् ।
तद्द्रव्यकरणे जातिचिन्तां न कुर्य्यात् ।

तंत्रान्तरमें कहा है कि पान करके, पानकरके वारं वार पानकरके यदि भूतलमें गिरै और उठतेही यदि फिर पानकरे तो पुनर्जन्म नहीं होता । यह वचन चतुर्थाश्रमीके पक्षमें विहित हुआ है, जो यह वाक्य ब्रह्मज्ञानसे संबंध रखता है कि बारंबार ब्रह्मानंद रसका पान करै तो इस द्रव्यके ग्रहण कालमें जातिका विचार न करै ।

तथा—मदिरायां मैथुने च जातिचिन्तां न कारयेत् ॥

तंत्रांतरमें लिखा है कि मद्यपानके विषयमें और स्त्री सम्भोगके विषयमें जातिका विचार न करै ।

पाने भ्रान्तिर्भवेद्यस्य घृणा स्याद्रक्तरेतसोः ।
शुचौ वाऽशुद्धताभ्रान्तिः पापाशंका च मैथुने ।
स भ्रष्टः पूजयेद्देवीं चण्डीमन्त्रं कथं जपेत् ॥

तंत्रांतरमें कहा है कि सुरापान करनेसे जिसका मन शंकितहो शुक्र शोणितमें जिसको घृणा उत्पन्न होतीहो, जो पुरुष विशुद्ध वस्तुको अशुद्ध समझे, स्त्रीके संसर्गमें जिसको

पापकी आशंकाहो, वह पुरुष भ्रष्ट है वह किस प्रकार चण्डी की पूजा और उनके मंत्रका जप करेगा ।

तथा—मदिरायां मैथुने च जातिवृत्तिं न चाचरेत् ।
एतेषां शोधनस्यावश्यकत्वम् ।

तथा च—संशोधनमनाचर्य्य स्त्रीषु मद्येषु साधकः ।
आचार्य्यः सिद्धिहानिःस्यात् क्रुद्धा भवति सुंदरी॥
मद्येषु मुख्यानुकल्पे ।

तथा—कुलपूजायामस्यावश्यकत्वम् ।

तथा च—मधुमांसं विना देवि कुलपूजां समारभेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥

तंत्रांतरमें कहा है कि मद्यग्रहण और मैथुनकालमें जातिविचार न करै। किंतु उस मद्य मांस मत्स्य मुद्रा और शक्तिका शोधन करना आवश्यक है । तंत्रमें कहा है—शक्ति और मद्य इत्यादि के विना शोधन किये ग्रहण करनेसे सिद्धिकी हानि होती है और भगवती क्रुद्धहोती है । यहां मद्यशब्दमें मुख्य और उसके स्थानकी वस्तु दोनोंको समझना चाहिये । तंत्रांतरमें लिखाहै—कुलपूजाके समय मद्य मांसादि की अत्यन्त आवश्यकता है, जो पुरुष मद्य और मांसके विना कुल पूजामें प्रवृत्त होताहै उसके सहस्र जन्मके पुण्य नष्ट होजाते हैं ।

तथा—यत्रासवमवश्यन्तु ब्राह्मणस्तु विशेषतः ।
तत्र गुडार्द्रकं दद्यात्तक्रं वा गुडामिश्रितम् ॥

तंत्रान्तरमें कहा है कि जहां ब्राह्मणको मद्यपान करनेकी अत्यन्त आवश्यकता है, वहां गुड और अदरक वा तक्र (मठा) मिश्रित गुड प्रदान करै ।

मांसादिशोधन ।

मांसन्तु त्रिविधं ज्ञेयं जलखेचरभूचरम् ।
संप्रोक्तं त्रिविधं मांसं देवताप्रीतिकारकम् ॥

मांस तीनप्रकारका है । जलचर, भूचर और खेचर । यह तीन प्रकारका मांस ही देवताकी प्रीति करनेवाला है ।

मत्स्यन्तु त्रिविधं देवि उत्तमाधममध्यमम् । उत्तमं त्रिविधं देवि शालपाठीनरोहितम् ॥ प्रवीणं कण्टकैर्हीनं तैलाक्तं बन्धनैर्युतम् । देव्याः प्रीतिकरञ्चैव मध्यमन्तच्चतुर्व्विधम् । क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ॥

मत्स्यभी उत्तम, मध्यम और अधम, तीन प्रकारका है । उत्तम मत्स्य भी शाल, पाठीन और रोहित यह तीन प्रकारहै, वा कंटक हीन मत्स्यको उत्तम मत्स्य कहा जाताहै । जो मत्स्य तेलसे व्याप्त और गाठोंसे युक्तहै, उसको मध्यम मत्स्य कहाजाता है । यह मध्यम मत्स्यभी देवीका प्रीतिजनक है, यह चार प्रकारहै, छोटे मत्स्य और कांटे युक्त मत्स्यको अधम मत्स्य कहतेहैं ।

भूचरमांस।

गोमेषाश्वमहिषकगोधाजोष्ट्रमृगोद्भवम्।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम्॥

भूचर मांस यथा–नीलगोमांस, मेषमांस, अश्वमांस, महिष मांस, गोधामांस (गोयका मांस) छागमांस. उष्ट्रमांस, मृग मांस, इन आठ प्रकारके मांसको महामांस कहते है यह सब मांसही देवताको प्रसन्न करनेवाले हैं।

मांसाभावे अनुकल्पः।

लवणार्द्रकपिण्याकतिलगोधूममाषकम्।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः॥

मांसके अभावमें अनुकल्पप्रदान किया जा सकताहै लवण, अदरक, पिण्याक, तिल, गेहूं, उर्द, लशुन यह कई द्रव्य मांसका अनुकल्प होसकते हैं।

मुद्रा तु द्विविधा।

कृषरं मण्डलाकारं चन्द्रबिम्बनिभं शुभम्।
चारु पक्कं मनोहारि शर्कराद्यैश्च पूरितम्॥
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता।
भ्रष्टधान्यादिकं यावच्चर्व्वणीयं प्रकल्पयेत्॥
तेषां संज्ञा कृता मुद्रा महामोदप्रदायिनी।

मुद्रा दो प्रकार की कुलार्णवमें लिखीहै कि चंद्रबिम्बकी समान मण्डलाकार सुपक्क मनोहर शर्करादिसे पूरित उत्तम कृषर

को मुद्रा कहतेहैं पूजाकालमें यह देवता को निवेदन करनी चाहिये । भ्रष्टधान्य इत्यादि अर्थात् भुने धान्य इत्यादि जो सब चाबनेके द्रव्य हैं उनको मुद्रा और चर्वणद्रव्य कहा जाताहै । यह अति आनन्ददायक है ।

शोधनमंत्र ।

ओं प्रतद्विष्णुरित्यादि मांसं ओं त्र्यम्बकमित्यादि मीनं ओं तद्विष्णोरित्यादि मुद्राञ्च शोधयेत् ।

'ॐ प्रतद्विष्णोस्तुवते' इस मंत्रसे मांस शोधन किया जाताहै "ॐ त्र्यम्बकं यजामहे" इस मंत्रसे मत्स्य शोधन होताहै "ॐ तद्विष्णोः परमं पदम्" इत्यादि मंत्रसे मुद्रा शोधन होताहै।

शक्तिशोधन ।

अदीक्षितकुलासङ्गात्सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणञ्चैव स्यात्तल्पगमनं यदि ॥
स कुलीनः कथं देवि पूजयेत्परमेश्वरीम् ।
श्रीक्रमे । संशोधनमाचर्य्येति ॥

अब शक्तिशोधन कहा जाता है । अदीक्षिता शक्तिके संसर्गमें सिद्धिकी हानि होती है । यदि कोई साधक अदीक्षिता शक्तिकी कथा सुने, वा उसकी शय्यामें जाय, तो वह किस प्रकार कुलीन होसकेगा ? किस प्रकार परमेश्वरी की पूजा करनेमें समर्थ होगा ? श्रीक्रममें कहा है । संशोधन विनाकिये मद्यपान और स्त्रीगमन करनेसे सिद्धिकी हानि होती है और भगवती भी क्रुद्ध होती हैं ।

अभिषेकाद्भवेच्छुद्धिर्म्मन्त्रस्योच्चारबिन्दुभिः ।
बलाद्वा यत्नतो वापि अभिषेकं समाचरेत् ॥

अभिषेकमंत्र ।

आदौ बालां समुच्चार्य्य त्रिपुरायै समुद्धरेत् ।
नमः शब्दं समुच्चार्य्य इमां शक्तिं ततो वदेत् ॥
पवित्रीकुरु शब्दान्ते मम शुद्धिं कुरु प्रिये ।
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रः सुरेश्वरि ॥
तस्याः कर्णेऽभेदबुद्ध्या मायाबीजं समुद्धरेत् ॥

इति शक्तिशोधनम् ।

कौलिका तंत्रमें कहाहै । मंत्रोच्चारणपूर्वक जलबिन्दु द्वारा कामिनीका अभिषेक करनेसे वह विशुद्ध और शक्ति होसकती है । अतएव बलपूर्वक वा यत्न पूर्वक कामिनीका अभिषेक करले ।

अभिषेक मन्त्रः यथाः—'ऐं क्लीं सौः त्रिपुरा-
यै नमः इमां शक्तिं पवित्रीकुरु मम सिद्धिं
कुरु स्वाहा।

हे सुरेश्वरि ! यही शक्तिके शोधनका मंत्रहै । अनन्तर अभेद बुद्धिसे उस शक्तिके कानमें मायाबीज प्रदान करै ।

इति शक्तिशोधन ।

ततः शोधितद्रव्यमध्ये निक्षिपेत् ।
पूर्वशोधितद्रव्यन्तु गुप्तेनैव च संक्षिपेत् ॥

आज्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः ।
कुण्डगोलोद्भवं द्रव्यं स्वयम्भूकुसुमन्तथा ॥
अर्घ्यं दत्वा महेशानि सर्व्वसिद्धीश्वरो भवेत् ।
सुरया चार्घ्यदानेन योगिनीनां भवेत्प्रियः ॥
महायोगी भवेद्देवि पीठप्रक्षालितैर्जलैः । पञ्चमात्तु परं नास्ति शाक्तानां सुखमोक्षयोः । केवलैः पञ्चमैर्व्वापि सिद्धो भवति साधकः । तेन पञ्चमकारेण पूजा कर्त्तव्या ।

अनन्तर शोधित द्रव्य अर्घ्य पात्रमें डाले । श्रीक्रममें अर्घ्य विधान स्थलमें कहा है कि, गुप्तभाव से पूर्व शोधित द्रव्य अर्घ्य पात्रमें डालना चाहिये । स्वतंत्र तन्त्रमें कहा है कि ज्ञानवान् पुरुष सावधान चित्तसे अर्घ्य पात्रमें पूर्व शोधित द्रव्य डालकर उसमें कुण्ड द्रव्य, गोलद्रव्य और स्वयम्भू कुसुम डालकर देवीको अर्घ्य प्रदान पूर्वक सिद्धि लाभ कर सकता है । सुराद्वारा अर्घ्य प्रदान करनेसे योगिनियोंका प्रिय होसकता है । हे देवि ! पीठको धोकर जलद्वारा अर्घ्य प्रदान करनेसे महा योगी होसकता है।तंत्रान्तरमें लिखा है—शक्तिमंत्रके उपासक पुरुषोंको पंचमकारके अतिरिक्त शुभ साधन वा मोक्ष साधन कुछ नहीं है । एक मात्र पंचम प्रकार के द्वारा साधक सिद्धि लाभ कर सकता है। अत एव पंचमकारसे पूजा करनी चाहिये ।

ततोऽर्घ्यस्थापनान्तरं पीठं पर्य्यंकमध्ये पूजयेत्। मण्डूकाय नमः इत्यादि क्रमेण।

तदुक्तम्-

पूजयेदथ पर्य्यंकमध्ये मण्डूकमग्रतः। कालाग्नि-रुद्रमाधारशक्तिकूर्म्ममनन्तकम्॥ वराहं पृथिवीं कन्दं नालञ्च केशराणि च। पद्मञ्च कर्णिकाञ्चैव मण्डलञ्च समर्च्चयेत्॥धर्म्मवैराग्यमैश्वर्य्यं ज्ञान-मज्ञानमेव च। अनैश्वर्य्यमवैराग्यमधर्म्ममपि पूजयेत्॥ ज्ञानविद्यात्मकञ्चैव ह्यात्मानञ्चापि पूज-येत्। गन्धपुष्पाक्षतादीनि दत्वा तत्रैव पूजयेत्॥ तथा तूलिकोपरि कुलं स्थापयित्वा प्रपूजयेत्।

तथाच-

तस्योपरि कुलं स्थाप्य पूजानुष्ठानमेव च। पूजयेच्च ततस्तस्यां पञ्च कामान् समाहितः॥

ह्रीञ्चैव कामराजञ्च क्लीं कन्दर्पं ऐं मन्मथं-
ब्लुं। मकरध्वजं स्त्रीञ्चैव हि मनोभवम्।
ओंङ्कारादिनमोंतञ्च कुसुमैर्गन्धसंयुतैः॥
अर्च्चयित्वा चतुर्दिक्षु पूजयेत्कुलनायिकाम्।
बटुकं भैरवञ्चैव दुर्गाञ्च क्षेत्रपालकम्॥
पूजावाक्यन्तु। ओं ह्रीं कामराजाय नमः।
इत्यादि। तत्र ऐं क्लीं स्त्रीं क्लीं ब्लुं आधार-

शक्ति श्री पादुकां पूजयामि । इत्यनेन-
तस्या ललाटे त्रिकोणं विलिखेत् ।

तथाच-

वाग्भवं कामबीजञ्च स्त्रीबीजं कामराजकम् ।
ब्लुमात्मकं ततो दत्वा आधारशक्तिमुद्धरेत् ॥
श्रीपादुकां ततो दत्वा पूजयामि वदेत्ततः ।
अनेन मनुना देवि ललाटे सुमनोहरम् ॥
त्रिकोणं तत्र संलिख्य सिन्दूराद्यैर्व्वरानने ।

उत्तरतंत्रे ।

तस्या मूर्ध्नि त्रिकोणञ्च यन्त्रमालिख्य साधकः ।
महाप्रेतासनं मध्ये बालाञ्च पूजयेत्ततः ॥
तत्र एवञ्च हे सौः सदाशिव महाप्रेत पद्मासनाय नमः । इति पूजयेत् । ततो बालां कामेश्वरीञ्च पूजयेत् ।

कुलार्णवे ।

गणेशञ्च कुलाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीम् ।
त्रिकोणेषु च संयोज्य वसन्तं मदनं प्रिये ॥
स्तनयोः पूजयेत् पश्चान्मुखे तस्याः सुधाकरम् ।
मौलौ गणेशं केशाग्रे कुलाध्यक्षं ललाटके ॥
दुर्गां भ्रुवोस्तथा लक्ष्मीं रसनायां सरस्वतीम् ।
इति यत्स्थानवैपरीत्यं तदैच्छिकम् ॥

अनंतर अर्घ्यस्थापनके पीछे पर्यङ्कमें "मण्डुकाय नमः" इत्यादि मंत्रसे पीठपूजा करनी चाहिये। कहाहै कि पर्यङ्कमें प्रथम मण्डूककी पूजाकरके पीछे कालाग्नि, रुद्र, कूर्म्म, अनंत, वराह, पृथ्वी, कंद, नाल केशरसमूह, पद्म, कर्णिका, मण्डल, धर्म, वैराग्य, ऐश्वर्य, ज्ञान, अज्ञान, अनैश्वर्य, अवैराग्य अधर्म इन समस्तपीठोंकी पूजाकरके अन्तमें ज्ञानविद्यात्मक आत्माकी पूजाकरै। अनन्तर गंधपुष्प अक्षतादि द्वारा देवता की पूजाकरके पर्य्यंकके ऊपर कुलस्थापन पूर्वक पूजाका अनुष्ठान करना चाहिये। मंत्र यथा—"ह्रींकामराजाय नमः क्लीं कन्दर्पाय नमः ऐं मन्मथाय नमःब्लुं मकरध्वजाय नमः स्त्रीं मनोभवाय नमः" गंधपुष्पसे इनपंचकामकी पूजा करनी चाहिये। चारोंदिशाओंकी इसप्रकार पूजाकर पीछे कुलनायिकाकी पूजाकरनी चाहिये। फिर बटुक भैरव दुर्गा, और क्षेत्रपाल इनकीभी पूजाकरनी चाहिये "ऐं ह्रीं श्रीं क्लीं ब्लुं आधार शक्तिश्रीपादुकां पूजयामि" यह मंत्र पढकर शक्तिके ललाटदेशमें त्रिकोण यंत्र लिखे। तंत्रान्तरमें लिखा है,—हेवरानने! ऐं क्लीं इत्यादि मंत्र पढकर सिन्दूरादि द्वारा शक्तिके ललाटमें मनोहर त्रिकोण यंत्र लिखे। उत्तर तंत्रमें कहा है—शक्तिके मस्तकमें त्रिकोण मंत्र लिखकर "हसौः सदाशिव महाप्रेत पद्मासनाय-नमः" यह मंत्र पढ, महा प्रेतासनकी पूजा करके पीछे बाला और कामेश्वरीकी पूजा करै। कुलार्णवमें लिखा है—गणेश,

कुलाध्यक्ष, दुर्गा, लक्ष्मी, सरस्वती, त्रिकोण यंत्रमें इन सब देवी देवताओंकी पूजा करके दोनों स्तनमें वसन्त और मदनकी पूजा करै । फिर मुखमंडलमें सुधाकरकी पूजा करै । उत्तर तंत्रमें कहा है—मस्तकमें गणेश केशाग्रमें कुलाध्यक्ष, ललाटमें दुर्गा दोनों भौंओंमें लक्ष्मी, रसनामें सरस्वतीकी पूजा करनी चाहिये । भिन्न भिन्न वचनोंमें पूजा स्थानकी विपरीतता देखी जाती है, अत एव साधक इच्छानुसार किसी एक मतका अनुष्ठान करै ।

ज्ञानार्णवे ।

दक्षपादादि मूर्द्धान्तं वाममूर्द्धादि सुन्दरि ।
पादान्तं पूजयेत्सर्व्वाः कला वै कामसोमयोः ॥
श्रद्धा प्रीती रतिश्चैव भूतिः कान्तिर्मनोभवा ।
मनोहरा मनोरामा मदनोत्पादिनी तथा ॥
मोहिनी दीपनी चैव शोषणी च वशंकरी ।
रञ्जनी चैव देवेशि षोडशी प्रियदर्शना ॥
षोडशस्वरसंयुक्ता एताः कामकला यजेत् ॥

वाक्यंतु—

अंश्रद्धायै नमः आंप्रीत्यै नमः इत्यादि ।
ततश्चन्द्रकलाः पूज्याः शिरसश्चरणावधि ।
पूषा रमा च सुमना रतिः प्रीतिस्तथा धृतिः ॥
शुद्धिः सौम्या मरीचिश्च शैलजे चांशुमालिनी ।

अंगिरा वशिनी चैव छाया संपूर्णमण्डला ॥
तथा तुष्टचमृता चैव कलाः सोमस्य षोडश
अंगिरास्थाने मदिरेतिपाठः ।

ज्ञानार्णवमें कहाहै"–हे सुंदरी ! दहिने चरणसे मस्तक पर्यन्त और मस्तकके वाम अंशसे वाम चरण पर्यन्त काम कला और सोमकलाकी पूजा करनी चाहिये । काम कला–यथा,–श्रद्धा, प्रीति, रति, भूति, कान्ति, मनोभवा, मनोहरा, मनोरमा, मदनोत्पादिनी, मोहिनी, दीपनी, शोषणी, वशंकरी, रञ्जनी, षोडशी, और प्रियदर्शना इन सोलह कामकलाकी पूजा करै।वाक्य यथा–'अं श्रद्धायै नमः ओं प्रीत्यै नमः इत्यादि अनन्तर मस्तकसे आरंभ करके चरण पर्यन्त चक्रके सोलह कलाकी पूजा करनी चाहिये। सोलह कला यथा पूषा, कला सुमना, रति, प्रीति, धृति, शुद्धि, सौम्या, मरीचि, अंशुमालिनी, अंगिरा,वशिनी छाया,संपूर्णमण्डला, तुष्टि और अमृता हे शैलनन्दिनी ! यह सोलह चन्द्रकी कला हैं, किसी किसी पुस्तकके अंगिरा स्थलमें मादिरा पाठ दिखाई देता है।

उत्तरतन्त्रे ।

स्त्रैरेव ाह पूज्या हि सर्व्वकार्य्यार्थसिद्धये ।
भागे तदीये विज्ञेया नाड्यस्तिस्त्रः प्रवाहिकाः ॥
एका तु वाहिका चान्द्री सौरी चान्या तु वाहिका
आग्नेय्या चापरा ज्ञेया पूजयेत्तास्तु साधकः ।

अम्बु स्रवति चान्द्री सा पुष्पं स्रवति भानवी ।
बीजं स्रवति चाग्नेयी तास्तु नामभिरर्च्चयेत् ।
वाग्भवाद्यैर्नमोयुक्तैः पूजयेत्सुप्रसन्नधीः ।
तेन ऐं चान्द्र्यै नमःऐं सौर्य्यै नमः ऐं आग्नेय्यै नमः।

उत्तरतंत्रे—

पूजयेन्मदनागारे रक्तचन्दनचर्च्चिते ।
भगमालामनुं प्रोच्य त्रितारानन्तरं तथा॥
तथा ऐं ह्रीं श्रीं ऐं ह्रीं श्रा ऐं जं ब्लुं क्लिन्ने
ततः परम् । सर्व्वाणीति भगानीति वशमा-
नय ततः परम् ॥
स्त्रींह्रीं क्लीं ब्लुं भगमालिन्यै नमः ।
ऐं ह्रींश्रीं इति मन्त्रेण गन्धाद्यैस्तामर्च्चयेत् ।
ततस्तु तत्रैव—मूलं पूजयेत् ।

तंत्रान्तरे—इहाप्यावाहनं नास्ति जीवन्यासो महेश्वरि ।
अथैवञ्च विधानेन तां षोडशोपचारकैः ।
इष्टदेवीं प्रपूज्याथ सर्व्वसिद्धीश्वरो भवेत् ॥
ततः स्वलिंगं पूजयेत् ।
अर्च्चयेद्गन्धपुष्पाद्यैः स्वशिवं तदनन्तरम् ।
ततो मूलमन्त्रं ओं नमः शिवाय ततः परम् ।
यजेत्तत्पुरुषाघोरसद्योजातकसंज्ञकैः ॥
श्रीविद्यायान्तु—

तारञ्च भुवनेशानीं तथा त्रिपुरसुन्दरीम् ।
नमः शिवाय विद्येयं दशार्णा परिकीर्त्तिता ॥
इति विशेषः । सुन्दरीं सुन्दरीं त्रिकुटां
तत्पुरुषादिमन्त्रस्तु पूर्वोक्तः ।
निर्वृतिश्च प्रतिष्ठाञ्च विद्याञ्च तदनन्तरम् ॥
शक्तिञ्च शान्त्यतीताञ्च तदंगे तदनन्तरम् ।
समग्रविद्यामुच्चार्य्य त्रिकोणञ्चैव पूजयेत् ॥
अवधूतेश्वरीं कुब्जां कामाख्यां समयामपि ।
चक्रेश्वरीं कालिकाञ्च तथा दिक्करवासिनीम् ॥
महाचण्डेश्वरीं तारां पूजयेदथ साधकः ।
तदनुज्ञां ततो लब्ध्वा दत्त्वा तांबूलमेव च ॥
शिवञ्च तत्र निःक्षिप्य गजतुण्डाख्यमुद्रया ।
धर्म्माधर्म्महविर्दीप्ते ह्यात्माग्नौ मनसः श्रुता ॥
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ।
स्वाहान्तोऽयं महामंत्रो ह्यारम्भे परिकीर्त्तितः ॥
ततो जपेत्स्त्रियं गच्छन्विद्यां त्रिभुवनेश्वरीम् ।
जपेदिति, अष्टोत्तरसहस्रं शतं वाऽक्षुब्धो जपेत् ।
प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनी श्रुचा ।
धर्म्माधर्म्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ।
स्वाहान्तोऽयं महामंत्रः शुक्रत्यागे प्रकीर्त्तितः ॥

विशेषस्तु ज्ञानार्णवे ।

शिवशक्तिसमायोगो योग एव न संशयः ।
शीत्करो मन्त्रजापश्च वचनं स्तवनं भवेत् ॥
आलिङ्गनञ्च कस्तूरी कर्पूरं चन्दनं भवेत् ।
नखदंष्ट्राक्षतादीनि पुष्पाणि विविधानि च ॥
मैथुनं तर्पणं विद्धि बीजपातो विसर्ज्जनम् ॥

उत्तर तंत्रमें लिखाहै—इन सोलह चन्द्रकलाओंमें सोलह स्वरवर्ण मिलाकर पूजा करनेसे समस्त कार्य सिद्ध होताहै। ललितातंत्रमें लिखाहै शक्तिकी कुलागारमें प्रवाहि तीन नाडीहैं, तिनमेंएक नाडी चान्द्री,एक नाडी सौरी और एक नाडी आग्नेयी है। साधक इन तीन नाडियोंकी पूजा करै। इन तीनों नाडियोंमें चान्द्री नाडी जल, सौरी नाडी पुष्प और आग्नेयी नाडी बीजक्षरण करती है। नामोच्चारण पूर्वक इन तीनों नाडियोंकी पूजा करनी चाहिये। ललिता तंत्रमें लिखाहै पहिले ऐं, फिर नमः, मिलाकर प्रसन्न हृदयसे पूजा करे। वाक्य यथा—'ऐं चान्द्र्यै नमः' इत्यादि। उत्तर तंत्रमें कहा है— रक्तचंदन चर्च्चित मदनागारमें पूजा करनी चाहिये। मंत्र यथा—पहिले भगमालामंत्र पढकर फिर 'ऐं क्लीं सौः ऐं ह्रीं श्रीं ऐं जं' क्लिन्ने सर्व्वाणि वशमानय स्त्रीं ह्रीं क्लीं कं भगमालिन्यै नमः ऐं ह्रीं श्रीं' इस मंत्रसे गंधादि उपचार प्रदान करैं। फिर मदनागारमें अपने इष्टदेवताकी पूजा करै। तंत्रान्तरमें लिखा

है कि हे महेश्वरि ! यहां पूजा करनेमें आवाहन नहीं और जीवन्यास भी नहीं है, केवल षोडशोपचारसे इष्टदेवताकी पूजा करनेपर समस्त सिद्धि लाभ करसकता है । अनन्तर स्वलिंगकी पूजा करै । तंत्रमें लिखा है कि इसके पीछे तत्पुरुष, अघोर सद्योजात नामसे पूजा करै।श्रींविद्याविषयमें ओं ह्रीं ऐं क्लीं सौः नमः शिवाय, इस दशाक्षर मंत्रसे निज शिवकी पूजा करै । तत्पुरुषादि मंत्र पहिले कहागया है फिर शक्तिके अंगमें निवृत्ति प्रतिष्ठा, विद्या, शक्ति शान्त्यतीं, इन सब देवताओंकी पूजा करै । फिर पूर्वोक्त, मंत्र उच्चारण पूर्वक त्रिकोणकी पूजा करनी चाहिये । फिर अवधूतेश्वरी, कुब्जा, कामाख्या, समया, चक्रेश्वरी, कालिका, दिक्करवासिनी, महाचण्डेश्वरी और ताराकी पूजा करै । अनन्तर शक्तिको ताम्बूल प्रदान पूर्वक उसकी अनुमति ले गजतुण्ड मुद्रा द्वारा कुलागारमें निज शिव निक्षेप करै । इसका मंत्र—यथा—धर्माहविर्दीप्त,इत्यादि । इस मंत्रका अर्थ यथा—प्रदीप्त आत्मारूप अग्निमें मनोरूप स्रुक्द्वारा सुषुम्नापथमें धर्माधर्मरूप होवे और इन्द्रिय वृत्तिसमुदय आहुति प्रदान करताहूं । आरंभके समय स्वाहान्त यह मंत्र पढना चाहिये।अनन्तर इसप्रकार शक्तिसंगतहो अक्षुब्ध हृदयसे अष्टोत्तर सहस्र अथवा अष्टोत्तर शत १०८ इष्टमंत्रका जप करै । अनन्तर शुक्रत्यागके समय 'प्रकाशाकाशहस्ता' यह मंत्र स्वाहान्त पाठ करै । ज्ञानार्णवमें विशेषरूपसे कहा है कि, शिवभक्ति योगका नामही

योग है, इसमें सन्देह नहीं है इस स्थलमें शीत्कारही मंत्र जप वाक्यही स्तव, आलिंगनही कस्तूरी, चुम्बनही कर्पूर,नखक्षत, दन्तक्षत इत्यादिही बहुविध पुष्प, मैथुनही तर्पण, और वीर्यपातही विसर्जनहै ।

कुलार्णवे ।

आलिङ्गनं चुंबनञ्च स्तनयोर्म्मर्दनन्तथा ।
दर्शनं स्पर्शनं योनेर्व्विकाशो लिंगघर्षणम् ।
प्रवेशः स्थापनं शक्तेर्नव पुष्पाणि पूजने ॥

कुलार्णवमें लिखा है—आलिंगन, चुम्बन, स्तनमर्दन, दर्शन स्पर्शन, योनिविकाश, लिंगघर्षण, प्रवेशस्थापन, इन नौ प्रकारके पुष्पोंसे पूजा करै ।

यामले ।—संयोगाज्जायते सौख्यं परमानन्दलक्षणम्
कुलामृतं प्रयत्नेन गृह्णीयाद्दुर्ल्लभं नरः ।
तेनामृतेन दिव्येन सर्व्वे तुष्टा भवन्ति हि ।
यत्कामं कुरुते मन्त्री तत्क्षणादेव सिध्यति ।

यामलतंत्रमें लिखा है शिवभक्ति संयोगसे परमानंदमय सुख प्राप्त होताहै अतएव साधक दुर्लभ दिव्य कुलामृत लेवे, इसके द्वारा संपूर्ण देवता संतुष्ट होतेहैं, यह कुलामृत प्रदान करके साधक जो जो कामना करता है, वह तत्काल सिद्ध होती है ।

ज्ञानार्णवे—कुलद्रव्यञ्च संशोध्य शिवभक्तिमयं प्रियो यो
वामृतं परं ब्रह्मरूपं निःक्षिप्य सुन्दरि ॥

अर्घपात्रामृतैर्घृष्ट्वा निर्विकल्पः सदानघः।
श्रीविद्याक्रममभ्यर्च्य परब्रह्ममयो भवेत्॥
इति ते कथितं ज्ञानं सर्व्वरम्यं वरानने।
सविकल्पस्तु सततं पापभाग्जायते नरः॥
विचिकित्सापरो मंत्री जायते गुरुतल्पगः।
अत एव वरारोहे निर्विकल्पःसदा भवेत्॥

ज्ञानर्णवमें कहा है—हे सुंदरी! शिवशक्तिमय कुलद्रव्य शोधन पूर्वक उसमें ब्रह्मरूप बीजामृत डालकर अर्घ्य पात्रस्थ अमृतसे पूजा कर निर्विकल्प और निष्पाप हो। इस प्रकार श्रीविद्याके क्रमानुसार पूजा करनेसे साधक परब्रह्ममय होताहै! यहांपर श्रीविद्यापर उपलक्षणमात्र (कथनपर) है। संपूर्ण देवताओंके संबंधमें इसी प्रकार जानना चाहिये। वरानने! यह मैंने तुमसे संपूर्ण ज्ञानका विषय कहा। इस विषयमें संदेहयुक्त होनेसे मनुष्य पापका भागी होता है, जो पुरुष संदेह करेगा, वह गुरुदारगामीकी समान महापातकी होगा, अत एव हे महेश्वरी! संदेह रहित चित्तसे यह सब साधन करै।

कुलामृतं समादाय तदर्घ्यें निःक्षिपेत्ततः।
तदर्घ्येण समाराध्य पूजाशेषं समापयेत्॥

कुलामृतं शोधितम्।

अन्तमें कुलामृत लेकर अर्घ्यपात्रमें डालना चाहिये

उस अर्घ्यके जलसे पूजा करके पूजा समाप्त करै परन्तु यह कुलामृत शोधन करलेनाचाहिये ।

शोधनमंत्रस्तु श्रीचक्रेम ।

अमृते ह्यमृतोद्भवे ह्यमृतवार्षिणि प्रिये ।
देवि पदं शुक्रशापं प्रमोचय पदद्वयम् ॥
अमृतं स्रावयद्वन्द्वममृतं कुरु युग्मकम् ।
स्वाहा पदं ततो देवि शुक्रशुद्धिर्भवेत्प्रिये ॥

शोधनमंत्र--यथा,--"अमृते अमृतोद्भवे अमृतवार्षिणि देवि शुक्रशापं प्रमोचय प्रमोचय अमृतं स्रावय अमृतं स्रावय अमृतं कुरु अमृतं कुरु स्वाहा"

हे देवि । इस मंत्र से शुक्रशुद्धि होती है ।

शुक्रैरक्षततण्डुलैः सुगन्धैः कुसुमैर्युतैः ।
अर्घ्यद्रव्यैश्च देवेशि योनौ देवीं प्रपूजयेत् ॥

सुगंधित पुष्प और अक्षतोंसे यह शुक्र अर्घ्य जलमें मिश्रित कर इस कुलागारमें ही इष्ट देवताकी पूजा करै ।

उत्तरतंत्रे ।

धूपदीपैश्च नैवेद्यैर्विविधैः कुलसाधकः ।
विधाय वान्दितां ताञ्च तदुच्छिष्टं स्वयञ्चरेत्॥

उत्तरतंत्रमें लिखाहै—कुलसाधक पुरुष धूप,दीप,नैवेद्य, इत्यादि अनेक प्रकारकी वस्तुसे शक्तिकी पूजा करके स्वयं उसका उच्छिष्ट भोजन करै ।

शिवागमे च।

अविचारं शक्त्युच्छिष्टं पिबेच्छक्रपुरो यदि।
घोरञ्च नरकं याति कुलमार्गात्पतेद्ध्रुवम्॥
तस्माद्विचार्य्य यत्नेन शक्त्युच्छिष्टं चरेत्सुधीः।
आनन्दं कारयेद्वीरस्तत्त्वं निर्भ्रान्तितःपिबेत्॥

यदि कर्त्तव्याकर्त्तव्यका विचार न करके इन्द्रादि देवता-भी शक्तिका उच्छिष्ट पान करैं तो कुलमार्गसे भ्रष्ट होकर वह-भी घोर नरकमें जाते हैं, अतएव ज्ञानवान् पुरुषका कर्त्तव्य यही है कि यत्नपूर्वक विचार करके शक्तिका उच्छिष्ट पान करे। स्वामीका कर्त्तव्य यही है कि जिससे शक्तिको आनन्द हो, इसप्रकार तत्त्व प्रदान करै। और आप जिससे भ्रान्त न हो, ऐसे भावसे तत्त्व प्रदान करै।

कुलामृते-

पूजाकालं विना नैव पश्येच्छक्तिं दिगम्बराम्।
पूजाकालं विना नैव सुधा पेया च साधकैः॥ आयुषा हीयते स्पृष्ट्वा पीत्वा च नरकं व्रजेत्॥

इति कुलपूजा।

कुलामृतमें लिखा है-कि, पूजाकालके अतिरिक्त दिगम्बरा (नग्न) शक्तिको न देखे, और पूजाकालके अतिरिक्त अन्य समयमें सुधापानभी न करै। साधक यदि पूजाकालके अति-रिक्त शक्ति वा सुरास्पर्श वा पान करेगा, तो वह हीनायु और नरकगामी होगा।

वीर्य्यामोघीकरण ।

भाद्रमासि रवौ पुष्ये ग्रहणीयं प्रयत्नतः । करे बद्धा तु रात्रौ च सप्तपर्णफलं शुभम् ॥ प्रत्यहं लक्षमानेन प्रजपेन्निशि संयतः । षड्भिर्वर्षैश्च सिद्धिः स्यान्नात्र कार्या विचारणा॥तत्फलं वदने स्थाप्य भवेद्दै दारसंगतः। वन्ध्या वा काकवन्ध्या हि नष्टवीर्य्यस्तु यः पुमान् सुरूपं लभते पुत्रं दीर्घजीविनमेव च॥ मन्त्रस्तु–कां कां लिंलीं पुंसः पुत्रं दापय दापय स्वाहा।

भाद्रमासके पुष्यनक्षत्रयुक्त रविवारमें सप्तपर्ण (सातौन) वृक्षका फल तोड,बाहुमें बांध, रात्रिके समय "कांकां" इत्यादि मंत्र एक लाख जपै। नित्य इसीप्रकार जप करना चाहिये । छै वर्ष इसप्रकार करनेसे मंत्र सिद्ध होताहै। इसप्रकारसे मंत्र सिद्ध होनेपर नष्ट वीर्यपुरुष अथवा काकवन्ध्या वा वन्ध्या (बांझ) स्त्रीभी सुरूप और दीर्घजीवी पुत्र प्राप्त करसक्ती है ।

बालकका क्रंदन–निवारक–कवच ।

ह्रूं देवी चण्डिका पातु ह्लीं ह्लीं शाकिनी हाकिनी द्रीं द्रीं हूँ फट् रोदनं सम्वरसम्वर तथा ॥ कवचस्य प्रसादेन धारणाच्छ्रवणात्तथा । स्थिरो भवति बालश्च सन्त्यज्य रोदनं ध्रुवम् ॥

"ह्रूं देवी" इत्यादि कवच धारण वा श्रवण करनेपर इस कवचके प्रसादसे बालक बालिका रोदन सम्वरण पूर्वक शान्त होते हैं । इसमें संदेह नहीं।

देव विद्यालभ।

क्रीं क्रीं क्रुं क्रुं क्रुं सः हसखफ्रेंठः ठः ठःस्वाहा।

प्रत्यहमयुतं जपेत्। त्रिवर्षेण सिद्धिः।

"क्रीं क्रीं" इत्यादि मन्त्र नित्य अयुत (दश हजार) संख्यक जप करे तीन वर्ष जपकरनेसे मंत्रसिद्धि होती है। इस मंत्रका जपकरनेसे अत्यन्त दुर्बुद्धि पुरुषभी सुबुद्धि लाभकरके सहजमें ही अति कठिन बातके समझनेमें समर्थ होताहै।

षोडशी-कवच।

षोडशीकवचस्यास्य ऋषिर्देवो जनार्दनः।
छन्दोऽनुष्टुप् च विज्ञेयं मोक्षार्थेनियोगः स्मृतः॥

इस षोडशी कवचके ऋषि जनार्दन, छन्द अनुष्टुप् और मोक्षार्थमें इसका विनियोगहै।

उग्रा मे हृदयं पातु कण्ठं पातु महेश्वरी।
उज्जटा नयने पातु कर्णौ च विन्ध्यवासिनी॥
ललाटे विशाखा पातु शाकिनी राकिनी तथा
लाकिनी बाहुयुग्मं मे पादौ दिक्करवासिनी॥
अन्यान्यङ्गाप्रत्यङ्गानि। षोड़शी पातु सन्ततम्॥

उग्रा मेरे हृदय महेश्वरी कंठ उज्जटा नयन विन्ध्यवासिनि कर्ण, विशाखा एवं शाकिनी और राकिनी ललाट, लाकिनी दोनों बाहु दिक्करवासिनी दोनों पैर और अन्यान्य अंग प्रत्यङ्ग की षोड़शी देवी सदा रक्षाकरें।

धनदं, भोगदं देवि आयुरारोग्यकारणम् ।
यशस्यं नरनार्य्योस्तु मनोमिलनकारकम् ॥
मोक्षदं विघ्ननाशञ्च नरनारीवशङ्करम् ॥

यह कवच धनप्रद, भोगप्रद, आयुप्रद, आरोग्यजनक, यशप्रद और मोक्षका देनेवाला है इसके प्रसादसे स्त्री पुरुषका परस्पर मनोमिलन होताहै । इसके द्वारा सम्पूर्ण विघ्न नष्टहोतेहैं और नरनारीको वशीभूतकियाजाताहै ।

सर्वव्याधिविघ्न-प्रशमन कवच ।

सदाशिव उवाच ।

कवचस्य ऋषिर्देवि महारुद्रो महेश्वरः ।
छन्दोऽनुष्टुप्चविज्ञेयं देवी संसारनाशिनी ।
धर्म्मार्थकाममोक्षाणां विनियोगश्च साधने ॥

महादेवजी बोले—हे देवि! इस कवचके ऋषि महारुद्ररूपी महेश्वर छन्द अनुष्टप् देवता संसारनाशिनी देवी और चतुर्वर्ग साधनमें इसका विनियोग है ।

ऐं क्लीं च पातु शीर्षं मां शक्तिबीजं तथा हृदि ।
हे सौः पातु नाभिदेशे सुन्दरी कण्ठदेशतः ॥
महेश्वरी सर्व्वगात्रे कौमारी दक्षिणे तथा ।
वैष्णवी पूर्व्वतः पातु उत्तरे सर्व्वमङ्गला ॥
पश्चिमे पातु वाराही इन्द्राणी पातु नैर्ऋते
शून्येऽनलेऽनिले क्षेत्रे सर्वत्र भुवनेश्वरी ॥

ऐं क्लीं मेरे मस्तक,शक्तिबीज हृदय हसौः नाभिदेश,सुन्दरी कंठ माहेश्वरी सर्व गात्र कौमारी दक्षिणदिक् वैष्णवी पूर्वदिक् सर्व मंगला उत्तर दिक् वाराही पश्चिमदिक्, इन्द्राणी नैर्ऋत दिक् और भुवनेश्वरी शून्यमें अनलमें, अनिलमें और क्षेत्रमें सर्वत्र रक्षा करैं।

इदन्तु कवचं पुण्यं धारणाच्छ्रवणादपि।
न दुःस्वप्नो भवेत्तस्य न बिभीषिकादर्शनम्॥
दूषितज्वरभीतिश्च न च पीडकपीडनम्।
संक्रामकव्याधिभयं कदापि न च जायते॥
अपस्मारादि-रोगाणां वायून्मादादिनामपि।
स्त्रीरोगाणाञ्च देवेशि नाशनं कवचोत्तमम्॥
डाकिनीपिशाचीभूतदृष्टिनिवारकं परम्।
वाणभयं वज्रभयं हिंस्रजन्तुभयं तथा॥
जलजन्तुभयञ्चैव क्षिप्रं नाशयते ध्रुवम्।

इस पवित्र कवचको धारण वा श्रवण करनेसे दुःस्वप्न बिभीषिका दर्शन (भयकी वस्तु) दूषित ज्वरभय,अत्याचारियोंसे पीडन संक्रामकव्याधिभय, अपस्मारादि (मिरगीआदि) रोग, वायुरोग, उन्मादरोग, डाकिनी, पिशाची भूत इत्यादिकी दृष्टि वाणभय, वज्रभय, हिंसक जन्तुभय और जलजन्तु भय दूर होताहै। गृहगण्डी और गृहरक्षा।

ॐ ह्रीं चण्डे चामुण्डे भ्रुकुटि अट्टाट्टे भीमदर्शने रक्ष रक्ष चौरेभ्यः वज्रेभ्यः अग्निभ्यः श्वापदेभ्यः दुष्टेभ्यः

जनेभ्यः सर्व्वेभ्यः सर्वोपद्रवेभ्यः गण्डीः ह्रींह्रींठःठः अष्टोत्तरशताभिमन्त्रितां गण्डीं दद्यात् ।

यह मंत्र एकसौ आठवार पढकर जिस घरके चारों ओर गण्डी (रेखा) दीजाय, उस गण्डी और उस घरमें चोर आदिके प्रवेशका भय, अग्निभय, वज्रभय, हिंस्रजन्तु भय और दुष्ट जनोंको भय नहीं रहता +।

वशीकरण—ह्रीं ह्रीं ठः ठः ।

इस मंत्रद्वारा सातबार अभिमंत्रितकिये सिन्दूरसे ललाटमें तिलककरै । इसतिलकको जो देखेगा वही पुरुष मोहित होकर वशीभूतहोगा ।

क्रोधशान्ति ।

ह्रीं ठीं ठीं क्रोधप्रशमन ह्रीं ह्रीं ह्रां क्लीं सः सः स्वाहा ।

यह मंत्र सातवार पढकर पहिरनेके वस्त्रके एक कोनेमें एक गांठलगावे, फिर क्यापुरुष, क्यास्त्री, जिसको क्रोधहुआहो, उसके निकट उपस्थित होनेपर उसका क्रोध शान्त होताहै ।

द्वारोद्घाटन—(द्वारखोलना)

ज्वल ज्वल उज्ज्वलोज्वल, द्वारं उद्घाटय उद्घाटय सर्व्ववित् कुट्टकुट्ट स्मिथस्मिथ सों सों चालिदि सर्वनिकृन्तानि स्पर्शस्पर्श ह्रीं ह्रीं क्लीं क्लीं जीं स्वाहा। अष्टोत्तरशतमामन्त्र्य स्पृशेत् ।

द्वार जिस किसी प्रकारही बन्द क्यों नहो, उक्तमंत्र एकसौ

+ यह मंत्र पहिले सिद्ध करलेना चाहिये । वटवृक्षपर चढ एकपैरसे [illegible]के नित्यरात्रिमें एक हजार जप करै । इस प्रकार तीनवर्षमें सिद्ध ।

आठवार पढकर द्वारको स्पर्श करनेसे तत्काल द्वार खुल जाता-है । यह मंत्र करोड जपद्वारा पहिले सिद्धकर लेना चाहिये ।

हिंस्रजन्तुस्तम्भन ।

ॐहुंगंग्लौंहरिद्रागणपतये वरवरंद,
सर्व्वजन्तुहृदयस्तंभनं कुरु कुरु स्वाहा ।

पहिले तो श्मशानमें बैठ,दूसरेकी दृष्टिसे छिप नित्य रात्रिके समय यह मन्त्र जपै । दश लाख मंत्र समाप्त होनेपर ही मंत्र-सिद्धि होतीहै । फिर यदि कभी, सिंह, व्याघ्र रीछ, गीदड, कुत्ता, सर्प वा अन्यकोई जन्तु आक्रमण करनेमें उद्यत होतो इस मंत्रको एकसौ आठवार पढतेही वह जन्तु पीछेको पैर धरता-हुआ भाग जायगा ।

नारीसौभाग्यकरण ।

कृष्णां चतुर्द्दशीं प्राप्य पुनरन्यां चतुर्द्दशीम् ।
प्रत्यहं प्रजपेन्मत्रं नारी सहस्रसंख्यया ॥
आधयो व्याधयस्तस्य नश्यन्ति नात्र संशयः ।

मन्त्रस्तु–ॐ ह्रीं कपालिनि कुलकुण्डलिनि
मे सिद्धिं देहि भाग्यं देहि देहि स्वाहा ।

कृष्णचौदशसे आरंभ करके उसके आगेकी कृष्णचौदश-तक नित्य एकहजार"ॐ ह्रीं" इत्यादि मंत्र जपै । इसप्रकार करनेसे उस स्त्रीके देहमेंआधिव्याधि आक्रमण नहीं करसकती । और विशेषकर वह पति पुत्रवती एवं चिरसौभाग्यवती होतीहै

आपदनिस्तारण ।

मार्गशीर्षे तु पूर्णायां शिखिमूलं समुद्धरेत् ।
बाहौ शिरसि वा धार्य्यं विवादे विजयो भवेत् ॥

अगहन मासकी पूर्णिमाको अपामार्ग (चिरचिरे) की जड उखाडकर बाहुमें अथवा मस्तकमें धारण करै, इससे मुकदमें तथा विवादमें जय होताहै ।

इच्छानुसार देहपरिवर्त्तन ।

रात्रौ कृष्णचतुर्द्दश्यां मयूरास्ये विनिक्षिपेत् ।
भृङ्गीबीजं मृदं कृष्णां कृष्णभूमौ निधापयेत् ॥
तज्जातभृंगी संग्राह्या अर्च्चयेद्रक्तपुष्पकैः ।
तत्पुष्पकर्णः पुरुषो मयूरो दृश्यते जनैः ॥

कृष्णपक्षीय चौदशकी रात्रिमें एक मोरका मस्तक लाय, उसमें भृगराज (भांगरे) के बीज और कालीमिट्टी एकत्र स्थापन कर काली मिट्टीमेंही गाड़दे । जब इस बीजसे वृक्ष उत्पन्न होकर पुष्प प्रस्फुटित (फूलनिकले) हो तो रक्त पुष्पोंसे उ वृक्षकी पूजा करके एक पुष्प ग्रहण करै । यह पुष्प कानमें रखनेसे वह मयूररूपी दीखताहै ।

तद्योगे कृष्णमार्ज्जारमुखे चैरण्डबीजकम् ।
तज्जातैराण्डबीजानामेकं क्षेत्रे निधापयेत् ।
तं प्रपश्यन्ति मार्ज्जारं मनुष्या नात्र संशयः ॥

कृष्णपक्षीय चौदशकी रात्रिमें कालीबिल्लीके मुखमें एरण्डबीज कालीमट्टीके सहित बोकर मट्टीमेंही गाडदे । जब इस बीजसे वृक्ष उत्पन्न होकर उसमें फल लगै, तो उसका

एक फल मुखमें धारण करनेसे वह मनुष्योंको बिल्लीके रूपमें दीखताहै।

शृगालश्वानमेषाजवदने वापयेत् पृथक् ।
मयूरास्ये यथा भृंगी जाता सिद्धिश्च तादृशी ॥

शृगाल,कुक्कुर, मेष और बकरी इन सब जीवोंका मस्तक लाकर पृथक् पृथक् स्थानमें भांगरे के बीज और कालीमिट्टी के सहित गाड़दे जब इन सब बीजोंसे वृक्ष उत्पन्न होकर फल लगैं तब उस फलको मुखमें धारण करनेसे वह उक्त शृगालादि जीवोंकी समान मनुष्योंको दिखाई देताहै।

मृता च श्वपची नारी तस्या यो नौ तु खादिरम् ।
कीलकं निक्षिपेत् पश्चाद्दग्ध्वा भस्म समुद्धरेत् ।
तेनैव तिलकं कृत्वा श्वपचीरूपधृग्भवेत् ॥

मरीहुई व्याधकी स्त्रीके मूत्रस्थानमें एक टुकडा खैर काष्ठ का प्रविष्ठ करै अनन्तर यह काष्ठका टुकडा लाकर उसको दग्ध करै, फिर इसकी भस्मका कपालमें तिलक करनेसे वह व्याधरूपी दीखताहै।

शिग्रुबीजोत्थितं तैलं पारावतपुरीषकम् ।
वराहस्य वसायुक्तं शिखिमूलं समं समम् ।
ललाटे तिलकं तेन यः करोति स वै जनः ॥
पञ्चास्यो दृश्यते लोकैम्मासार्धंच्च सदाशिवः ।

सैंजनेके बीजोंका तेल जंगली कबूतरकी विष्ठा, शूकर की चरबी और चिरचिरेकी जड, यह सब द्रव्य बराबर ले एकत्र पीसकर ललाट में तिलक करै जो पुरुष इस प्रकार

तिलक करताहै, वह साक्षात् श्रीमहादेवजी के समान पांचमुख युक्त दीखता है ।

सद्यो हतस्य वीरस्य ग्राह्यं चौरस्य वा शिरः ।
तद्वक्त्रे कृष्णधत्तूरबीजं वाप्यंसमृत्तिकम् ॥
रात्रौ कृष्णचतुर्दश्यामाषाढे भैरवं यजेत् ।
नानाविधोपहारेण पुष्पधूपाक्षतादिभिः ॥
शिरः खनेत् कृष्णभूमौ भुक्तोच्छिष्टेन सेचयेत् ।
दीपं रात्रौ सदा दद्यात् सूत्रवर्त्त्याज्यसंयुतम् ॥
सफलस्तु भवेद्यावत्तावद्रक्षेच्च पूजयेत् ।
ग्राह्यं कृष्णचतुर्दश्यां बलिं दद्याच्च कुक्कुटम् ॥
पञ्चाङ्गं पेषयेत्तस्य वटिकां कारयेत् दृढाम् ।
ललाटे तिलकं कुर्य्यात् स नरो दृश्यते जनैः ।
तादृशस्तु सहस्राक्षरूपो नैवात्र संशयः ॥

सद्योहत (तत्काल मरे हुए) किसी वीर पुरुषका अथवा चोरका मस्तक लाकर उसके मुखमें काले धतूरे के बीज मिट्टी के सहित बोवे । इसके पीछे आषाढके महीनेकी कृष्णपक्षीय चतुर्दशी रात्रिमें पुष्प, धूप और अक्षतादि अनेक प्रकारके उपहारोंसे भैरव देवकी पूजा करके काली मिट्टीसे यह मस्तक गाडदे । फिर भोजन करके कुल्लेके जूठे जलद्वारा सेचन कर रात्रिमें घृतका दीपकदे । इस प्रकार जबतक इस बीजसे वृक्ष उत्पन्न होकर फल उत्पन्न न हो, तब तक इस स्थानमें

दीपदान और पूजा करै । इसके उपरान्त कृष्णपक्षीय चौदशकी रात्रिमें भैरवकी पूजा और कुक्कुट बलि प्रदान करके इस वृक्षका पञ्चांग, अर्थात् फल, मूल, पत्र, पुष्प और छाल ले एकत्र पीस दृढ वटिका (गोलीसी) करै यह गोलीवाशलाका घिस कर ललाटमें तिलक करनेसे वह साक्षात् इन्द्रके समान सहस्रलोचन दिखाई देताहै ।

द्रव्यशोधन ।

ओं ह्रीं त्रिपुटि त्रिपुटि कठ कठ आभिचारिकदोषं कीटपतङ्गादिस्पृष्टदोषं रिप्वादिदूषितं हनहन् नाशयनाशय–शोषयशोषय हुं फट् स्वाहा ।

यदि कोई द्रव्य मंत्रबलसे मंद साधककी कुक्रियासे, विषादि मन्द द्रव्यके स्पर्शसे अथवा कीट पतंगादिके संसर्गसे या अन्य किसी प्रकारसे अशुद्ध होकर व्यवहार करनेके योग्य न रहा हो, तो इस मंत्रके द्वारा एकसौ आठवार मंत्रित कर लेनेसेही शुद्ध होताहै ।

द्रव्यविनाशन ।

गृह्णीयात् कदलीमूलं पुष्यार्के भाद्रमासि च ।
सप्ताभिमन्त्रितं देवि निक्षिपेत् रजनीमुखे ।
सप्ताह शस्यक्षेत्राणां शस्यं वै नश्यति ध्रुवम् ॥
गोमहिषीप्रभृतीनां क्षीरं नश्यति निश्चितम् ।
वृक्षे क्षिप्तं महेशानि शुष्यति नात्र संशयः ॥

मन्त्रस्तु—द्रां द्रीं शोषयशोषय मारयमारय क्लीं फट्
ह्रीं ह्रूं सः सः ।

भाद्रमासके रविवारको पुष्य नक्षत्रमें केलेकी जड लाकर ह्रां ह्रीं, इत्यादि मंत्रसे सातवार अभिमंत्रितकर संध्याके समय धान्यके खेतमें डालनेसे एकसप्ताहमें शस्यनष्ट हो जाता है इसमें संदेहनहीं । गोमहिषीके शरीरपर डालनेसे दूधनष्टहोताहै वृक्षादिके ऊपर डालनेसे वृक्षादि सूखजातेहैं ।

बाणसाधन ।

आः ह्रीं ठं ठं फुः ।

थोडीसी धूरि वा सरसों हाथमें ले, उक्तमंत्रसे सातवार अभिमंत्रितकर जिसके ऊपर डालीजाय, वह विलक्षण यंत्रणा पाकर स्तम्भित हो जायगा ।

उसका प्रतीकार ।

ॐ सर्व्वनिकृन्तनि महाजम्भले शान्ति कुरुकुरु स्वाहा । अष्टोत्तरशताभिमन्त्रितेन प्रशमनम् ।

इत्यादि यह मंत्र एकसौ आठ वार पढने पर पूर्वोक्त दोषकी शान्ति होतीहै और वह पुरुष सुस्थ होताहै ।

नष्टद्रव्य लाभ ।

वह्निः कोषातकी वज्री श्वेतार्कगिरिकर्णिका ।
वचा पाठा च निर्गुण्डी कटुतुम्ब्याश्च मूलकम् ॥
निम्बकेशरबीजानि गोमूत्रैः पेषयेच्छनैः ।
अनेन पादलेपेन नष्टं नेत्रं गतं भवेत् ॥

वह्नि (चीता) कोषातकी, (झिमनीलता) वज्री (हरशंकरी) श्वेतआँक, अपराजिता, वच, पाठा निर्गुण्डी और कडवी तूंबीकी जड (इन सब वृक्षोंकी जड) और निम्ब व नागकेशरके बीज यह सब द्रव्य एकत्र कर गोमूत्रके संग पीसे। फिर इस पिसे हुए द्रव्य द्वारा पैरमें लेप करनेसे, नष्ट द्रव्य जिस स्थानमें क्यौं न हो, दीख जायगा।

गुरुदर्शन।

भौमामायां तिथौ रात्रौ गत्वा श्मशानभूमिषु।
अयुतं प्रजपेत् साधुर्गुरुपादपरायणः।
जपान्ते ध्यानयोगेन प्राप्नोति गुरुदर्शनम्॥

मन्त्रस्तु।—ह्रीं हुं गुरो प्रसीद ह्रीं ओं।

मंगलवार अमावस्या-तिथिमें रात्रिके समय अकेला श्मशानमें जाय गुरुके चरण कमलोंकी चिन्ता करता हुआ 'हुं हुं' इत्यादि मंत्र अयुत संख्यक १०००० जपे। गुरु बहुत दिनसे लोकान्तरित होनेपर भी जपके अन्त समय ध्यान योगमें साधकको दर्शन देंगे।

त्रिकालदर्शन।

रात्रौ पञ्चवटीमूले पञ्चमुण्डासने शुभे।
उपविश्य जपेन्मन्त्री त्रिपक्षं यतमानसः॥
यदि विघ्ना न जायन्ते यदि नो दृश्यते जनैः।
तदा सिद्धिर्भवेद्देवि त्रिकालतत्त्वविद्भवेत्॥

मंत्रस्तु।—ह्रीं ह्रीं ह्रूं सः।

रात्रिके समय पंचवटीकी जड़पर (जहां पांच वट हों) पंचमुंड़ वेदीमें बैठकर जप करे । तीन पक्ष संयत चित्तसे जप करना चाहिये । यदि इस बीचमें कोई विघ्न उपस्थित न हो और कोई जप करता न देखे, तो सिद्धि लाभ होतीहै । वह साधक, भूत भविष्यत्, वर्त्तमान त्रिकालज्ञ होताहै । जपका मंत्र ऊपर लिखाहै ।

तिर्य्यक्शब्दज्ञान ।

श्मशाने प्रजपेन्मन्त्री प्रत्यहं लक्षमानतः ।
समारभ्य प्रतिपदि अमावस्यावसानकम् ।
ततः सिद्धिर्भवेद्देवि तिर्य्यक् शब्दविचारवित् ।
मन्त्रस्तु–क्रों क्रों ह्रूं झुं हुः ।

पड़वासे अमावस्यातक नित्य श्मशानमें एक लक्ष उपरोक्त मंत्रका जप करै । इस प्रकार करनेसेही साधक पक्षी इत्यादि तिर्यक् जीवोंका शब्द समझ सकताहै ।

शल्योद्धार ।

घरमें मिट्टीके भीतर जो मृतक, अस्थि, गौका कंकाल शवके केश, शवांगार इत्यादि अनेक प्रकारके द्रव्य रहते हैं, उनका ही नाम शल्य है । इन शल्य समूहको न निकालनेसे घरमें अमंगल होता है । इनको निकालना हो तो यथाविधि वस्तु पूजा करके रात्रिके समय एक ताम्र कुण्डमें एक वाण लिंग शिव रख, उस ताम्र कुण्डमें बिल्वपत्रसे 'ह्रीं ह्रीं क्रीं क्रीं गच्छ गच्छ शीघ्रं गच्छ शल्यमुत्पाटय ह्रीं ह्रीं स्वाहा' यह मंत्रलिखै । ताम्रकुण्ड आतप तण्डुलके ऊपर रक्खे

इस प्रकार करनेसे प्रातःकालमें दिखाई देगा कि, ताम्रकुण्डके सहित बाण लिंग स्थनान्तरित होकर जिस स्थानमें शल्य है उसी स्थानमें उपस्थितहुआ है। तब खोदकर शल्य निकाले और फिर रात्रिमें ऐसाही करे। इसी प्रकार जितने शल्य हों, उन सबको निकाले। जब बाणलिंग फिर स्थानान्तरित न हो, तभी समझना चाहिये कि अब शल्य नहीं है। तात्पर्य यह है कि उक्त मंत्र गुरु-के मुखसे यथावत् ग्रहण करके एक वर्ष तक एकान्तमें बैठकर नित्य सहस्र संख्यक जप द्वारा पहिले सिद्ध कर लेना चाहिये।

देव-देवीका बीजमंत्र।

(भुवनेश्वरीका मंत्र) आं ह्रीं क्रौं।

(अन्नपूर्णाका मंत्र)

ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।

(त्रिपुटाका मंत्र) श्रीं ह्रीं क्लीं।

(त्वरिता मंत्र)

ओं ह्रीं हुं खे च छे क्ष स्त्री हुं क्षे ह्रीं फट्।

(नित्या-मन्त्र)

ऐं क्लीं नित्य क्लिन्मे मदद्रवे स्वाहा।

(दुर्गामन्त्र)-ओं ह्रीं दुं दुर्गायै नमः।

महिषमर्द्दिनीमंत्र)-महिषमर्द्दिनि स्वाहा।

(जयदुर्गामंत्र)-ओं दुर्गेदुर्गे रक्षिणि स्वाहा।

(शूलिनी मंत्र)

ज्वलज्वल शूलिनी दुष्ट ग्रह हुं फट् स्वाहा।

(वागीश्वरी मंत्र)–वदवद वाग्वादिनि स्वाहा ।

(गणेश मंत्र)–गं ।

(हारिद्रा गणेशका मंत्र)–ग्लं ।

(लक्ष्मी मंत्र)–श्रीं ।

(सूर्य–मंत्र)–ओं घृणिसूर्य आदित्य ।

(विष्णु मंत्र)

१ केशवाय नमः (२) नारायणाय नमः (३) माधवाय नमः ।

कुलकुण्डलिनी सिद्धि ।

गुरुदेवं प्रपूज्याथ श्मशाने प्रान्तरे तथा ।
वर्षत्रयं जपेद्धीमान् कुण्डलीगतमानसः ॥
सिद्धिर्भवति देवेशि कुण्डलीतत्त्ववित् भवेत् ॥

मन्त्रस्तु–"ह्रं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः कुण्डलिनि जगन्मातः सिद्धिं देहिदेहि स्वाहा ॥"

प्रत्यहमयुतं जपेत् । इति

गुरुदेवकी पूजा करके आचमन पूर्वक श्मशानमें, वा प्रान्तरमें जाय तीन वर्षतक प्रतिदिन 'ह्रं ह्रां, इत्यादि मंत्र दश हजार जपै। इसप्रकार करनेसे कुण्डलिनी सिद्धि होतीहै। कुण्डलिनी सिद्धि होनेपर वह साधक सहजमेंही षट् चक्र भेदका ज्ञाताहोजाताहै।

इतिश्रीमुरादाबाद-निवासी कात्यायन गोत्रोत्पन्न-श्रीसुखानन्द मिश्रात्मज-पंडितकन्हैयालालमिश्रकृत भाषाटीका सहिता धन्वन्तरि तंत्राशिक्षा सम्पूर्णा ।

समाप्तोऽयं ग्रन्थः ।

"श्रीवेङ्कटेश्वर" स्टीम्-यन्त्रालय-बंबई.

ह. ८.९. आनु शर्मा